# mahAvAkyaratnAvalI upaniShadAntargatam

# મહાવાક્યરત્નાવલી ઉપનિષદાન્તર્ગતમ્

## Document Information

Text title : mahAvAkyaratnAvalI from Upanishad

File name : upanishadmahAvAkyaratnAvalI.itx

Category : vedanta, major_works, upanishhat

Location : doc_z_misc_major_works

Author : rAmachandrendra

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 1008 Great Contemplations of Advaita from 108 upanishads

Latest update : January 23, 2016, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# મહાવાક્યરત્નાવલી ઉપનિષદાન્તર્ગતમ્

અનુક્રમણિકા


१ સાર્ધાન્તિકવિધિવાક્યાનિ । (૬૬)

२ સાર્ધાન્તિકબન્ધમોક્ષવાક્યાનિ । (૩૧)

૩ સાર્ધાન્તિકાવિદ્વન્નિન્દાવાક્યાનિ । (૨૧)

૪ સાર્ધાન્તિકજગન્મિથ્યાવાક્યાનિ । (૩૩)

૫ સાર્ધાન્તિકોપદેશવાક્યાનિ । (૫૪)

૬ સાર્ધાન્તિકજીવબ્રહ્મૈક્યવાક્યાનિ । (૩૮ )

૭ સાર્ધાન્તિકમનનવાક્યાનિ । (૩૯)

૮ સાર્ધાન્તિકજીવન્મુક્તિવાક્યાનિ । (૧૧૯)

૯ સાર્ધાન્તિકસ્વાનુભૂતિવાક્યાનિ । (૧૧૮)

૧૦ સાર્ધાન્તિકસમાધિવાક્યાનિ । (૫૦)

૧૧ સાર્ધાન્તિકાષ્ટવિધિસ્વરૂપવાક્યેષુ નાનાલિઙ્ગસ્વરૂપવાક્યાનિ ॥ (૩૨)

૧૨ સાર્ધાન્તિકપુંલિઙ્ગસ્વરૂપવાક્યાનિ । (૩૦)

૧૩ સાર્ધાન્તિકસ્ત્રીલિઙ્ગસ્વરૂપવાક્યાનિ । (૧૨)

૧૪ સાર્ધાન્તિકનપુંસકલિઙ્ગસ્વરૂપવાક્યાનિ ॥ (૩૯)

૧૫ સાર્ધાન્તિકાત્મસ્વરૂપમહાવાક્યાનિ । (૪૦)

૧૬ સાર્ધાન્તિકસર્વસ્વરૂપવાક્યાનિ ॥ (૪૦)

૧૭ સાર્ધાન્તિકબ્રહ્મસ્વરૂપવાક્યાનિ । (૯૪)

૧૮ સાર્ધાન્તિકાવશિષ્ટવાક્યાનિ । (૩૬)

૧૯ સાર્ધાન્તિકફલવાક્યાનિ । (૪૦)

૨૦ સાર્ધાન્તિકવિદેહમુક્તિવાક્યાનિ ॥ (૭૭)


---

१ અથ સાર્ધાન્તિકવિધિવાક્યાનિ । (૬૬)

ૐ સર્વં ખલ્વિદં બ્રહ્મ તજ્જલાનિતિ શાન્ત ઉપાસીત ॥ १॥

છાન્દોગ્ય ૩।१૪।१*

આત્માનમેવાવેદહં બ્રહ્માસ્મીતિ ॥ ૨॥

બૃહદારણ્યક ૧।૪।૧૦*

આત્મા વા અરે દ્રષ્ટવ્યઃ શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યઃ ॥ ૩॥

બૃહદારણ્યક ૨।૪।૫*

મહત્પદં જ્ઞાત્વા વૃક્ષમૂલે વસેત્ ॥ ૪॥

સુબાલ ૧૩*

સચ્ચિદાનન્દાત્માનમદ્વિતીયં બ્રહ્મ ભાવયેત્ ॥ ૫॥

વજ્રસૂચિકા ૯*

અહં બ્રહ્માસ્મીત્યનુસન્ધાનં કુર્યાત્ ॥ ૬॥

પૈઙ્ગલ ૩।૨*

સ તજ્જ્ઞો બાલોન્મત્તપિશાચવજ્જડવૃત્ત્યા લોકમાચરેત્ ॥ ૭॥

મણ્ડલબ્રાહ્મણ ૫।૪*

બ્રાહ્મણઃ સમાહિતો ભૂત્વા તત્ત્વંપદૈક્યમેવ સદાભ્યસેત્ ॥ ૮॥

પૈઙ્ગલ ૩।૪

સર્વત્રાદ્વૈતબ્રહ્મબુદ્ધિં કુર્યાત્ ॥ ૯॥

????

આશામ્બરો ન નમસ્કારો ન સ્વાહાકારો ન સ્વધાકારો
ન નિન્દાસ્તુતિર્યાદૃચ્છિકો ભવેત્ ॥ ૧૦॥

પરમહંસ ૧૧*

સર્વતઃ સ્વરૂપમેવ પશ્યન્ જીવન્મુક્તિમવાપ્ય પ્રારબ્ધપ્રતિ-
ભાસનાશપર્યન્તં સ્વરૂપાનુસન્ધાનેન વસેત્ ॥ ૧૧॥

નારદપરિવ્રાજક ૭।૩

સ્વરૂપાનુસન્ધાનં વિનાઽન્યથાચારપરો ન ભવેત્ ॥ ૧૨॥

નારદપરિવ્રાજક ૫।૧

વેદાન્તશ્રવણં કુર્વન્ યોગં સમારભેત ॥ ૧૩॥

શાણ્ડિલ્ય ૧।૫।૫

આકુઞ્ચનેન કુણ્ડલિન્યાઃ કપાટમુદ્ઘાટ્ય મોક્ષદ્વારં વિભેદયેત્ ॥ ૧૪॥

શાણ્ડિલ્ય ૧।૧૦।૩૭

યચ્છેદ્વાઙ્મનસી પ્રાજ્ઞસ્તદ્યચ્છેજ્જ્ઞાન આત્મનિ ॥ ૧૫॥

કઠ ૧।૩।૧૩*

જ્ઞાનમાત્મનિ મહતિ નિયચ્છેત્તદ્યચ્છેચ્છાન્ત આત્મનિ ॥ ૧૬॥

કઠ ૧।૩।૧૩

આત્માનં ચેદ્વિજાનીયાદયમસ્મીતિ પૂરુષઃ ॥ ૧૭॥

શાટ્યાયની ૨૨*

કિમિચ્છન્કસ્ય કામાય શરીરમનુસંજ્વરેત્ ॥ ૧૮॥

શાટ્યાયની ૨૨

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ॥ ૧૯॥

શાટ્યાયની ૨૩*

નાનુધ્યાયાદ્બહૂઞ્શબ્દાન્વાચોવિગ્લાપનં હિ તત્ ॥ ૨૦॥

વરાહ ૪।૩૩

યતો નિર્વિષયસ્યાસ્ય મનસો મુક્તિરિષ્યતે ॥ ૨૧॥

અમૃતબિન્દુ ૩*

અતો નિર્વિષયં નિત્યં મનઃ કાર્યં મુમુક્ષુણા ॥ ૨૨॥

અમૃતબિન્દુ ૩

ચિત્તમેવ હિ સંસારસ્તત્પ્રયત્નેન શોધયેત્ ॥ ૨૩॥

મૈત્રાયણી ૪।૩*

દૃશ્યં હ્યદૃશ્યતાં નીત્વા બ્રહ્માકારેણ ચિન્તયેત્ ॥ ૨૪॥

તેજોબિન્દુ ૧।૫૦*

માયાકાર્યમિદં ભેદમસ્તિચેદ્બ્રાહ્મભાવનમ્ ॥ ૨૫॥

તેજોબિન્દુ ૬।૧૦૦

દેહોઽહમિતિ દુઃખં ચેદ્બ્રહ્માહમિતિ નિશ્ચયઃ ॥ ૨૬॥

તેજોબિન્દુ ૬।૧૦૦

હૃદયગ્રન્થિરસ્તિત્વે છેદને બ્રહ્મચક્રકમ્ ॥ ૨૭॥

તેજોબિન્દુ ૬।૧૦૧

સંશયે સમનુપ્રાપ્તે બ્રહ્મનિશ્ચયમાપ્નુયાત્ ॥ ૨૮॥

તેજોબિન્દુ ૬।૧૦૧

વિજ્ઞેયોઽક્ષરતન્માત્રો જીવિતં ચાપિ ચઞ્ચલમ્ ॥ ૨૯॥

પૈઙ્ગલ ૪।૧૭*

વિહાય શાસ્ત્રજાલાનિ યત્સત્યં તદુપાસ્યતામ્ ॥ ૩૦॥

પૈઙ્ગલ ૪।૧૭

યસ્ય સ્ત્રી તસ્ય ભોગેચ્છા નિસ્ત્રીકસ્ય ક્વ ભોગભૂઃ ॥ ૩૧॥

મહા ૩।૪૮*

સ્ત્રિયં ત્યક્ત્વા જગત્ત્યક્તં જગત્ત્યક્ત્વા સુખી ભવેત્ ॥ ૩૨॥

મહા ૩।૪૮*

ચિત્તં કારણમર્થાનાં તસ્મિન્સતિ જગત્ત્રયમ્ ॥ ૩૩॥

યોગશિખા ૬।૫૯*

તસ્મિન્ક્ષીણે જગત્ક્ષીણં તચ્ચિકિત્સ્યં પ્રયત્નતઃ ॥ ૩૪॥

યોગશિખા ૬।૫૯*

સુમેરુત્થાય સુમ્યન્તં બ્રહ્મૈકં પ્રવિચિન્ત્યતામ્ ॥ ૩૫॥

૨।૬૪*

ગચ્છઁસ્તિષ્ઠન્નુપવિશંશ્છયાનો વાન્યથાપિ વા ॥ ૩૬॥

કુણ્ડિકા ૨૮*

યથેચ્છયા વસેદ્વિદ્વાનાત્મારામઃ સદા મુનિઃ ॥ ૩૭॥

કુણ્ડિકા ૨૮

જ્યોતિર્લિઙ્ગં ભ્રુવોર્મધ્યે નિત્યં ધ્યાયેત્સદા યતિઃ ॥ ૩૮॥

બ્રહ્મવિદ્યા ૮૦*

આત્માનમાત્મનઃ સાક્ષાદ્બ્રહ્મબુદ્ધ્યા સુનિશ્ચલમ્ ॥ ૩૯॥

બ્રહ્મવિદ્યા ૨૯*

દેહજાત્યાદિસમ્બન્ધાન્વર્ણાશ્રમસમન્વિતાન્ ॥ ૪૦॥

બ્રહ્મવિદ્યા ૨૯

વેદશાસ્ત્રપુરાણાદિ પદપાંસુમિવ ત્યજેત્ ॥ ૪૧॥

બ્રહ્મવિદ્યા ૩૦

એકાકી નિઃસ્પૃહસ્તિષ્ઠેન્ન હિ કેન સહાલપેત્ ॥ ૪૨॥

નારદપરિવ્રાજક ૩।૫૯*

દદ્યાન્નારાયણેત્યેવં પ્રતિવાક્યં સદા યતિઃ ॥ ૪૩॥

નારદપરિવ્રાજક ૩।૫૯

મુનિઃ કૌપીનવાસાઃ સ્યાન્નગ્નો વા ધ્યાનતત્પરઃ ॥ ૪૪॥

નારદપરિવ્રાજક ૪।૩૨*

અધ્યાત્મરતિરાસીનો નિરપેક્ષો નિરાશિષઃ ॥ ૪૫॥

નારદપરિવ્રાજક ૩।૪૪*

આત્મનૈવ સહાયેન સુખાર્થી વિચરેદિહ ॥ ૪૬॥

નારદપરિવ્રાજક ૩।૪૪

સન્દિગ્ધઃ સર્વભૂતાનાં વર્ણાશ્રમવિવર્જિતઃ ॥ ૪૭॥

નારદપરિવ્રાજક ૪।૩૬*

અન્ધવજ્જડવચ્ચાપિ મૂકવચ્ચ મહીં ચરેત્ ॥ ૪૮॥

નારદપરિવ્રાજક ૪।૩૬

યદ્યત્પશ્યતિ ચક્ષુર્ભ્યાં તત્તદાત્મેતિ ભાવયેત્ ॥ ૪૯॥

યોગતત્ત્વ ૬૯*

યદ્યચ્છૃણોતિ કર્ણાભ્યાં તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૦॥

યોગતત્ત્વ ૭૦*

લભતે નાસયા યદ્યત્તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૧॥

યોગતત્ત્વ ૭૦

જિહ્વયા યદ્રસં હ્યત્તિ તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૨॥

યોગતત્ત્વ ૭૧*

ત્વચા યદ્યત્સ્પૃશેદ્યોગી તત્તદાત્મેતિ ભાવયેત્ ॥ ૫૩॥

યોગતત્ત્વ ૭૧*

દૃષ્ટિં જ્ઞાનમયીં કૃત્વા પશ્યેદ્બ્રહ્મમયં જગત્ ॥ ૫૪॥

તારસાર ૧।૨૯*

દ્રષ્ટ્દર્શનદૃશ્યાનાં વિરામો યત્ર વા ભવેત્ ॥ ૫૫॥

તારસાર ૧।૩૦*

દૃષ્ટિસ્તત્રૈવ કર્તવ્યા ન નાસાગ્રાવલોકની ॥ ૫૬॥

તારસાર ૧।૩૦

દેવાગ્ન્યગારે તરુમૂલે ગુહાયાં વસેદસઙ્ગોઽલક્ષિતશીલવૃત્તઃ ॥ ૫૭॥

શાટ્યાયની ૨૧*

નિરિન્ધનજ્યોતિરિવોપશાન્તો ન ચોદ્વિજેદુદ્વિજેદ્યત્રકુત્ર ॥ ૫૮॥

શાટ્યાયની ૨૧

શાન્તો દાન્ત ઉપરતસ્તિતિક્ષુર્યોઽનૂચાનો હ્યભિજજ્ઞૌ સમાનઃ ॥ ૫૯॥

શાટ્યાયની ૫*

ત્યક્તેષણો હ્યનૃણસ્તં વિદિત્વા મૌની વસેદાશ્રમે યત્ર કુત્ર ॥ ૬૦॥

શાટ્યાયની ૫*

યમૈશ્ચ નિયમૈશ્ચૈવ હ્યાસનૈશ્ચ સુસંયતઃ ॥ ૬૧॥

ત્રિશિખિબ્રાહ્મણ ૫૩*

નાડીશુદ્ધિં ચ કૃત્વાદૌ પ્રાણાયામં સમાચરેત્ ॥ ૬૨॥

ત્રિશિખિબ્રાહ્મણ ૫૩

સર્વચિન્તાં પરિત્યજ્ય સાવધાનેન ચેતસા ॥ ૬૩॥

વરાહ ૨।૮૩*

નિર્વિકલ્પઃ પ્રસન્નાત્મા પ્રાણાયામં સમાચરેત્ ॥ ૬૪॥

વરાહ ૫।૫૫

મરુદભ્યસનં સર્વં મનોયુક્તં સમભ્યસેત્ ॥ ૬૫॥

શાણ્ડિલ્ય ૧।૧૦।૩૭*

ઇતરત્ર ન કર્તવ્યા મનોવૃત્તિર્મનીષિણા ॥ ૬૬॥

શાણ્ડિલ્ય ૧।૧૦।૩૭*

---

૨ અથ સાર્ધાન્તિકબન્ધમોક્ષવાક્યાનિ । (૩૧)

દેહાદીનાત્મત્વેનાભિમન્યતે સોઽભિમાન આત્મનો બન્ધઃ ॥ ૧॥

સર્વસાર ૧

તન્નિવૃત્તિર્મોક્ષઃ ॥ ૨॥

સર્વસાર ૧

દેવમનુષ્યાદ્યુપાસનાકામસઙ્કલ્પો બન્ધઃ ॥ ૩॥

નિરલમ્બ*

કર્તૃત્વાદ્યહઙ્કારસઙ્કલ્પો બન્ધઃ ॥ ૪॥

નિરલમ્બ*

અણિમાદ્યષ્ટૈશ્વર્યાશાસિદ્ધસઙ્કલ્પો બન્ધઃ ॥ ૫॥

નિરલમ્બ*

યમાદ્યષ્ટાઙ્ગયોગસઙ્કલ્પો બન્ધઃ ॥ ૬॥

નિરલમ્બ

કેવલં મોક્ષાપેક્ષાસઙ્કલ્પો બન્ધઃ ॥ ૭॥

નિરલમ્બ*

સઙ્કલ્પમાત્રસમ્ભવો બન્ધઃ ॥ ૮॥

નિરલમ્બ

નિત્યાનિત્યવસ્તુવિચારાદનિત્યસંસારસુખદુઃખવિષયસમસ્તક્ષેત્રમમતા
બન્ધક્ષયો મોક્ષઃ ॥ ૯॥

નિરલમ્બ*

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ॥ ૧૦॥

શાટ્યાયની ૧*

બન્ધનં વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ ૧૧॥

ત્રિપુરતાપિની ૫।૩

મમેતિ બધ્યતે જન્તુર્નમમેતિ વિમુચ્યતે ॥ ૧૨॥

વરાહ ૨।૪૪*

મમત્વેન ભવેજ્જીવો નિર્મમત્વેન કેવલઃ ॥ ૧૩॥

યોગચૂડામણિ ૮૪*

સ્વસઙ્કલ્પવશાદ્બદ્ધો નિઃસઙ્કલ્પાદ્વિમુચ્યતે ॥ ૧૪॥

મહા ૨।૭૦*

દ્રષ્ટા દૃશ્યવશાદ્બદ્ધો દૃશ્યાભાવે વિમુચ્યતે ॥ ૧૫॥

મહા ૪।૪૮*

ઇચ્છામાત્રમવિદ્યેયં તન્નાશો મોક્ષ ઉચ્યતે ॥ ૧૬॥

મહા ૪।૧૧૬*

ભોગેચ્છામાત્રકં બન્ધસ્તત્ત્યાગો મોક્ષ ઉચ્યતે ॥ ૧૭॥

મહા ૫।૯૭*

ચિચ્ચૈત્યકલના બન્ધસ્તન્મુક્તિર્મુક્તિરુચ્યતે ॥ ૧૮॥

મહા ૬।૭૭*

અનાસ્થૈવ હિ નિર્વાણં દુઃખમાસ્થાપરિગ્રહઃ ॥ ૧૯॥

મહા ૪।૧૧૧*

કર્મણા બધ્યતે જન્તુર્વિદ્યયા ચ વિમુચ્યતે ॥ ૨૦॥

સન્ન્યાસ ૨।૯૮*

સ્વરૂપાવસ્થિતિર્મુક્તિસ્તદ્ભ્રંશોઽહન્ત્વવેદનમ્ ॥ ૨૧॥

મહા ૫।૨*

ચિત્તે ચલતિ સંસારો નિશ્ચલે મોક્ષ ઉચ્યતે ॥ ૨૨॥

યોગશિખા ૬।૫૮*

બન્ધો હિ વાસનાબદ્ધો મોક્ષઃ સ્યાદ્વાસનાક્ષયઃ ॥ ૨૩॥

મુક્તિકા ૨।૬૮*

પદાર્થભાવનાદાર્ઢ્યં બન્ધ ઇત્યભિધીયતે ॥ ૨૪॥

મહા ૨।૪૧*

વાસનાતાનવં બ્રહ્મન્ મોક્ષ ઇત્યભિધીયતે ॥ ૨૫॥

મહા ૨।૪૧

ન મોક્ષો નભસઃ પૃષ્ઠે ન પાતાલે ન ભૂતલે ॥ ૨૬॥

અન્નપૂર્ણા ૨।૨૩*

સર્વાશાસંક્ષયે ચેતઃક્ષયો મોક્ષ ઇતીષ્યતે ॥ ૨૭॥

અન્નપૂર્ણા ૨।૨૩*

મોક્ષો મેઽસ્ત્વિતિ ચિન્તાન્તર્જાતા ચેદુત્થિતં મનઃ ॥ ૨૮॥

અન્નપૂર્ણા ૨।૨૪*

મનનોત્થે મનસ્યેષ બન્ધઃ સાંસારિકો મતઃ ॥ ૨૯॥

અન્નપૂર્ણા ૨।૨૪

તદ્પ્રમાર્જનમાત્રં હિ મહાસંસારતાં ગતમ્ ॥ ૩૦॥

અન્નપૂર્ણા ૪।૫૬*

તત્પ્રમાર્જનમાત્રન્તુ મોક્ષ ઇત્યભિધીયતે ॥ ૩૧॥

અન્નપૂર્ણા ૧।૫૬*

ઇતિ સાર્ધાન્તિકબન્ધમોક્ષવાક્યાન્યેકત્રિંશત્ ॥ ૩૧॥

દ્વિતીયં પ્રકરણં સમાપ્તમ્ ।

---

3 અથ સાર્ધાન્તિકાવિદ્વન્નિન્દાવાક્યાનિ । (૨૧)

અથ યોઽન્યાં દેવતામુપાસ્તેઽન્યોસાવન્યોઽહમસ્મીતિ ન સ વેદ
યથા પશુઃ ॥ ૧॥

બૃહદારણ્યક ૧।૪।૧૦*

અત્ર ભિદામિત્ર મન્યમાનઃ શતધા સહસ્રધા ભિન્નો મૃત્યોઃ
સ મૃત્યુમાપ્નોતિ ॥ ૨॥

નૃસિંહતાપિની ૨।૮।૧*

કર્તૃત્વાદ્યહઙ્કારભાવનારૂઢો મૂઢઃ ॥ ૩॥

નિરલમ્બ*

મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ય ઇહ નાનેવ પશ્યતિ ॥ ૪॥

કઠ ૨।૧।૧૦*

અનુભૂતિં વિના મૂઢો વૃથા બ્રહ્મણિ મોદતે ॥ ૫॥

મૈત્રેયી ૨।૨૨*

પ્રતિબિમ્બિતશાખાગ્રફલાસ્વાદનમોદવત્ ॥ ૬॥

મૈત્રેયી ૧।૨૨

અષ્ટાઙ્ગં ચ ચતુષ્પાદં ત્રિસ્થાનં પઞ્ચદૈવતમ્ ॥ ૭॥

ધ્યાનબિન્દુ ૧૩

ૐકારં યો ન જાનાતિ બ્રાહ્મણો ન ભવેત્તુ સઃ ॥ ૮॥

ધ્યાનબિન્દુ ૧૪

અતિવર્ણાશ્રમં રૂપં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૯॥

વરાહ ૨।૬*

યો ન જાનાતિ સોઽવિદ્વાન્કદા મુક્તો ભવિષ્યતિ ॥ ૧૦॥

વરાહ ૨।૬

કુશલા બ્રહ્મવાર્તાયાં વૃત્તિહીનાઃ સુરાગિણઃ ॥ ૧૧॥

તારસાર ૧।૪૬*

તેઽપ્યજ્ઞાનતયા નૂનં પુનરાયાન્તિ યાન્તિ ચ ॥ ૧૨॥

તારસાર ૧।૪૬

કાષ્ઠદણ્ડો ધૃતો યેન સર્વાશી જ્ઞાનવર્જિતઃ ॥ ૧૩॥

નારદપરિવ્રાજક ૫।૨

સ્વાયત્તમેકાન્તહિતં સ્વેપ્સિતત્યાગવેદનમ્ ॥ ૧૪॥

મહા ૪।૮૯

યસ્ય દુષ્કરતાં યાતં ધિક્તં પુરુષકીટકમ્ ॥ ૧૫॥

મહા ૪।૮૯

અદ્વિતીયબ્રહ્મતત્ત્વં ન જાનન્તિ યથા તથા ॥ ૧૬॥

વરાહ ૨।૫૭*

ભ્રાન્તા એવાખિલાસ્તેષાં ક્વ મુક્તિઃ ક્વેહ વા સુખમ્ ॥ ૧૭॥

વરાહ ૨।૫૭

અજ્ઞાનોપહતો બાલ્યે યૌવને વનિતાહતઃ ॥ ૧૮॥

મહા ૬।૨૩*

શેષે કલત્રચિન્તાર્તઃ કિં કરોતિ નરાધમઃ ॥ ૧૯॥

મહા ૬।૨૩

ઇચ્છાદ્વેષસમુત્થેન દ્વન્દ્વમોહેન જન્તવઃ ॥ ૨૦॥

સન્ન્યાસ ૨।૩૦*

ધરાવિવરમગ્નાનાં કીટાનાં સમતાં ગતાઃ ॥ ૨૧॥

સન્ન્યાસ ૨।૩૦

ઇતિ સાર્ધાન્તિકાવિદ્વન્નિન્દાવાક્યાનિ એકવિંશત્ ॥ ૨૧ ॥

તૃતીયં પ્રકરણં સમાપ્તમ્ ।

૪ અથ સાર્ધાન્તિકજગન્મિથ્યાવાક્યાનિ । (૩૩)

નાન્યત્કિઞ્ચન મિષત્ ॥ ૧॥

ઐતરેય ૧

વાચારમ્ભણં વિકારો નામધેયં મૃત્તિકેત્યેવ સત્યમ્ ॥ ૨॥

છાન્દોગ્ય ૬।૧।૪

અતોઽન્યદાર્તમ્ ન તુ તદ્દ્વિતીયમસ્તિ ॥ ૩॥

બૃહદારણ્યક ૪।૨।૨૩

ન તુ તદ્દ્વિતીયમસ્તિ ॥ ૪॥

નૃસિંહતાપિની ૨।૮।૧

નાત્ર કાચન ભિદાઽસ્તિ નૈવ તત્ર કાચન ભિદાઽસ્તિ ॥ ૫॥

નૃસિંહતાપિની ૨।૧।૧

સર્વં વિકારજાતં માયામાત્રમ્ ॥ ૬॥

નૃસિંહતાપિની ૫

સર્વત્ર ન હ્યસ્તિ દ્વૈતસિદ્ધિઃ ॥ ૭॥

નૃસિંહતાપિની ૨।૯।૧

નાસ્તિ દ્વૈતં કુતો મર્ત્યમ્ ॥ ૮॥

સુબાલ ૫

પ્રપઞ્ચો યદિ વિદ્યેત નિવર્તેત ન સંશયઃ ॥ ૯॥

માણ્ડુક્યકારિકા ૧।૧૭*

માયામાત્રમિદં દ્વૈતમદ્વૈતં પરમાર્થતઃ ॥ ૧૦॥

માણ્ડુક્યકારિકા ૧।૧૭

વિકલ્પો વિનિવર્તેત કલ્પિતો યદિ કેનચિત્ ॥ ૧૧॥

માણ્ડુક્યકારિકા ૧।૧૮*

ઉપદેશાદયં વાદો જ્ઞાતે દ્વૈતં ન વિદ્યતે ॥ ૧૨॥

માણ્ડુક્યકારિકા ૧।૧૮

દ્વિતીયકારણાભાવાદનુત્પન્નમિદં જગત્ ॥ ૧૩॥

મહા ૫।૫૮*

યથૈવેદં નભઃ શૂન્યં જગચ્છૂન્યં તથૈવ હિ ॥ ૧૪॥

મહા ૫।૧૮૪

ઇદં પ્રપઞ્ચં યત્કિઞ્ચિદ્યદ્યજ્જગતિ વીક્ષ્યતે ॥ ૧૫॥

તેજોબિન્દુ ૫।૭૫*

દૃશ્યરૂપં ચ દૃગ્રૂપં સર્વં શશવિષાણવત્ ॥ ૧૬॥

તેજોબિન્દુ ૫।૭૫

ઇદં પ્રપઞ્ચં નાસ્ત્યેવ નોત્પન્નં નો સ્થિતં જગત્ ॥ ૧૭॥

તેજોબિન્દુ ૫।૩૧

ચિત્તં પ્રપઞ્ચમિત્યાહુર્નાસ્તિ નાસ્ત્યેવ સર્વદા ॥ ૧૮॥

તેજોબિન્દુ ૫।૩૨*

માયાકાર્યાદિકં નાસ્તિ માયા નાસ્તિ ભયં ન હિ ॥ ૧૯॥

તેજોબિન્દુ ૫।૩૩

પરં બ્રહ્માહમસ્મીતિ સ્મરણસ્ય મનો ન હિ ॥ ૨૦॥

તેજોબિન્દુ ૫।૩૦

વન્ધ્યાકુમારવચને ભીતિશ્ચેદસ્ત્વિદં જગત્ ॥ ૨૧॥

તેજોબિન્દુ ૬।૭૩

શશશૃઙ્ગેણ નાગેન્દ્રો મૃતશ્ચેજ્જગદસ્તિ સત્ ॥ ૨૨॥

તેજોબિન્દુ ૬।૭૪

મૃગતૃષ્ણાજલં પીત્વા તૃપ્તશ્ચેદસ્ત્વિદં જગત્ ॥ ૨૩॥

તેજોબિન્દુ ૬।૭૪

ગન્ધર્વનગરે સત્યે જગદ્ભવતિ સર્વદા ॥ ૨૪॥

તેજોબિન્દુ ૬।૭૫

ગગને નીલિમાસત્યે જગત્સત્યં ભવિષ્યતિ ॥ ૨૫॥

તેજોબિન્દુ ૬।૭૬

માસાત્પૂર્વં મૃતો મર્ત્યો હ્યાગતશ્ચેજ્જગદ્ભવેત્ ॥ ૨૬॥

તેજોબિન્દુ ૬।૮૦

ગોસ્તનાદુદ્ભવં ક્ષીરં પુનરારોપણે જગત્ ॥ ૨૭॥

તેજોબિન્દુ ૬।૮૧

જ્વાલાગ્નિમણ્ડલે પદ્મવૃદ્ધિશ્ચેદસ્ત્વિદં જગત્ ॥ ૨૮॥

તેજોબિન્દુ ૬।૮૪

જ્ઞાનિનો હૃદયં મૂઢૈર્જ્ઞાતં ચેદસ્ત્વિદં જગત્ ॥ ૨૯॥

તેજોબિન્દુ ૬।૯૬

અજકુક્ષૌ જગન્નાસ્તિ હ્યાત્મકુક્ષૌ જગન્ન હિ ॥ ૩૦॥

તેજોબિન્દુ ૬।૯૯

સર્વદાઽભેદકલને દ્વૈતાદ્વૈતં ન વિદ્યતે ॥ ૩૧॥

તેજોબિન્દુ ૬।૯૯

નાસ્તિ નાસ્તિ જગત્સર્વં ગુરુશિષ્યાદિકં ન હિ ॥ ૩૨॥

તેજોબિન્દુ ૫।૧૦૫

સચ્ચિદાનન્દમાત્રોઽહમનુત્પન્નમિદં જગત્ ॥ ૩૩॥

તેજોબિન્દુ ૬।૫૮

ઇતિ જગન્મિથ્યાવાક્યાનિ ત્રયસ્ત્રિંશત્ ॥ ૩૩॥

ચતુર્થં પ્રકરણં સમાપ્તમ્ ।

૫ અથ સાર્ધાન્તિકોપદેશવાક્યાનિ । (૫૪)

સ ય એષોઽણિમૈતદાત્મ્યમિદં સર્વં તત્સત્યં સ આત્મા તત્ત્વમસિ શ્વેતકેતો ॥ ૧॥

છાન્દોગ્ય ૬।૮।૧*

અભયં વૈ જનક પ્રાપ્તોઽસિ ॥ ૨॥

બૃહદારણ્યક ૪।૧।૪*

બ્રહ્મચર્યમહિંસાં ચાપરિગ્રહં સત્યં ચ યત્નેન
હે રક્ષતો હે રક્ષતો હે રક્ષત ઇતિ ॥ ૩॥

આરુણિક ૩*

તત્ત્વમસિ ત્વં તદસિ ॥ ૪॥

પૈઙ્ગલ ૩*

યન્મનસા ન મનુતે યેનાહુર્મનો મતમ્ ॥ ૫॥

કેન ૧।૬*

તદેવ બ્રહ્મ ત્વં વિદ્ધિ નેદં યદિદમુપાસતે ॥ ૬॥

કેન ૧।૫

યત્પરં બ્રહ્મ સર્વાત્મા વિશ્વસ્યાયતનં મહત્ ॥ ૭॥

કૈવલ્ય ૧।૧૬

સૂક્ષ્માત્સૂક્ષ્મતરં નિત્યં તત્ત્વમેવ ત્વમેવ તત્ ॥ ૮॥

કૈવલ્ય ૧।૧૬

અન્તઃપૂર્ણો બહિઃપૂર્ણઃ પૂર્ણકુમ્ભ ઇવાર્ણવે ॥ ૯॥

મૈત્રેયી ૨।૨૭

અન્તઃશૂન્યો બહિઃશૂન્યઃ શૂન્યકુમ્ભ ઇવામ્બરે ॥ ૧૦॥

મૈત્રેયી ૨।૨૭

મા ભવગ્રાહ્યભાવાત્મા ગ્રાહકાત્મા ચ મા ભવ ॥ ૧૧॥

મૈત્રેયી ૨।૨૮

ભાવનામખિલાં ત્યક્ત્વા યચ્છિષ્ટં તન્મયો ભવ ॥ ૧૨॥

વરાહ ૪।૧૯

દ્રષ્ટ્દર્શનદૃશ્યાદિ ત્યક્ત્વા વાસનયા સહ ॥ ૧૩॥

મહા ૬।૧૮

દર્શનપ્રથમાભાસમાત્માનં કેવલં ભજ ॥ ૧૪॥

મૈત્રેયી ૨।૨૯

ચિત્તાકાશં ચિદાકાશમાકાશશ્ચ તૃતીયકમ્ ॥ ૧૫॥

મહા ૪।૫૮

દ્વાભ્યાં શૂન્યતરં વિદ્ધિ ચિદાકાશં મહામુને ॥ ૧૬॥

મહા ૪।૫૮

ધ્યાનતો હૃદયાકાશે ચિતિ ચિચ્ચક્રધારયા ॥ ૧૭॥

મહા ૪।૯૩

મનો મારય નિઃશઙ્કં ત્વાં પ્રબધ્નન્તિ નારયઃ ॥ ૧૮॥

મહા ૪।૯૪

ભોગૈકવાસનાં ત્યક્ત્વા ત્યજ ત્વં ભેદવાસનામ્ ॥ ૧૯॥

મહા ૪।૧૦૯

ભાવાભાવૌ તતસ્ત્યક્ત્વા નિર્વિકલ્પઃ સ્થિરો ભવ ॥ ૨૦॥

મહા ૪।૧૦૯

ત્યજ ધર્મમધર્મં ચ ઉભે સત્યાનૃતે ત્યજ ॥ ૨૧॥

સન્ન્યાસ ૨।૧૨

ઉભે સત્યાનૃતે ત્યક્ત્વા યેન ત્યજસિ તત્ત્યજ ॥ ૨૨॥

સન્ન્યાસ ૨।૧૨

આત્મન્યતીતે સર્વસ્માત્સર્વરૂપેઽથવા તતે ॥ ૨૩॥

અન્નપૂર્ણા ૨।૨૫

કો બન્ધઃ કસ્ય વા મોક્ષો નિર્મૂલં મનનં કુરુ ॥ ૨૪॥

અન્નપૂર્ણા ૨।૨૫

આશા યાતુ નિરાશાત્વમભાવં યાતુ ભાવના ॥ ૨૫॥

અન્નપૂર્ણા ૫।૩૮

અમનસ્ત્વં મનો યાતુ તવાસઙ્ગેન જીવતઃ ॥ ૨૬॥

અન્નપૂર્ણા ૫।૩૮

એકમાદ્યન્તરહિતં ચિન્માત્રમમલં તતમ્ ॥ ૨૭॥

અન્નપૂર્ણા ૫।૬૫*

ખાદપ્યતિતરાં સૂક્ષ્મં તદ્બ્રહ્માસિ ન સંશયઃ ॥ ૨૮॥

અન્નપૂર્ણા ૫।૬૫

રક્ષકો વિષ્ણુરિત્યાદિ બ્રહ્મા સૃષ્ટેસ્તુ કારણમ્ ॥ ૨૯॥

તેજોબિન્દુ ૫।૫૧

સંહારે રુદ્ર ઇત્યેવં સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૩૦॥

તેજોબિન્દુ ૫।૫૨

મત્ત્યક્તં નાસ્તિ કિઞ્ચિદ્વા મત્ત્યક્તા પૃથિવી તુ વા ॥ ૩૧॥

તેજોબિન્દુ ૩।૧૯

મયાતિરિક્તં યદ્યદ્વા તત્તન્નાસ્તીતિ નિશ્ચિનુ ॥ ૩૨॥

તેજોબિન્દુ ૩।૨૦

અનાત્મેતિ પ્રસઙ્ગો વા અનાત્મેતિ મનોઽપિ વા ॥ ૩૩॥

તેજોબિન્દુ ૫।૧૫

અનાત્મેતિ જગદ્વાપિ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૩૪॥

તેજોબિન્દુ ૫।૧૬

આદિમધ્યાયસાનેષુ દુઃખં સર્વમિદં યતઃ ॥ ૩૫॥

અક્ષિ ૪૭*

તસ્માત્સર્વં પરિત્યજ્ય તત્ત્વનિષ્ઠો ભવાનઘ ॥ ૩૬॥

અક્ષિ ૪૭*

નિદ્રાયા લોકવાર્તાયાઃ શબ્દાદેરાત્મવિસ્મૃતેઃ ॥ ૩૭॥

અધ્યાત્મ ૫

ક્વચિન્નાવસરં દત્ત્વા ચિન્તયાત્માનમાત્મનિ ॥ ૩૮॥

અધ્યાત્મ ૫

સર્વવ્યાપારમુત્સૃજ્ય અહં બ્રહ્મેતિ ભાવય ॥ ૩૯॥

તેજોબિન્દુ ૬।૧૦૬*

અહં બ્રહ્મેતિ નિશ્ચિત્ય ત્વહંભાવં પરિત્યજ ॥ ૪૦॥

તેજોબિન્દુ ૬।૧૦૪

ઘટાકાશં મહાકાશ ઇવાત્માનં પરાત્મનિ ॥ ૪૧॥

અધ્યાત્મ ૭*

વિલાપ્યાખણ્ડભાવેન તૂષ્ણીં ભવ સદા મુને ॥ ૪૨॥

અધ્યાત્મ ૭

ચિદિહાસ્તીતિ ચિન્માત્રમિદં ચિન્મયમેવ ચ ॥ ૪૩॥

યાજ્ઞવલ્ક્ય ૨૩*

ચિત્ત્વં ચિદહમેતે ચ લોકાશ્ચિદિતિ ભાવય ॥ ૪૪॥

યાજ્ઞવલ્ક્ય ૨૩

સત્યચિદ્ઘનમખણ્ડમદ્વયં સર્વદૃશ્યરહિતં નિરામયમ્ ॥ ૪૫॥

વરાહ ૩।૬*

યત્પદં વિમલમદ્વયં શિવં તત્સદાહમિતિ મૌનમાશ્રય ॥ ૪૬॥

વરાહ ૩।૬

જન્મમૃત્યુસુખદુઃખવર્જિતં જાતિનીતિકુલગોત્રદૂરગમ્ ॥ ૪૭॥

વરાહ ૩।૭*

ચિદ્વિવર્તજગતોઽસ્ય કારણં તત્સદાહમિતિ મૌનમાશ્રય ॥ ૪૮॥

વરાહ ૩।૭

પૂર્ણમદ્વયમખણ્ડચેતનં વિશ્વભેદકલનાદિવર્જિતમ્ ॥ ૪૯॥

વરાહ ૩।૮*

અદ્વિતીયપરસંવિદાત્મકં તત્સદાહમિતિ મૌનમાશ્રય ॥ ૫૦॥

વરાહ ૩।૮

સ્વાત્મનોઽન્યદિવાભાતં ચરાચરમિદં જગત્ ॥ ૫૧॥

વરાહ ૨।૨૫

સ્વાત્મમાત્રતયા બુદ્ધ્વા તદસ્મીતિ વિભાવય ॥ ૫૨॥

વરાહ ૨।૨૫

વિલાપ્ય વિકૃતિં કૃત્સ્નાં સમ્ભવવ્યત્યયક્રમાત્ ॥ ૫૩॥

મુક્તિકા ૨।૫૦

યશોઽરિષ્ટં ચ ચિન્માત્રં ચિદાનન્દં વિચિન્તય ॥ ૫૪॥

મુક્તિકા ૨।૫૦

ઇતિ સાર્ધાન્તિકોપદેશવાક્યાનિ ચતુઃપઞ્ચાશત્ ॥ ૫૪॥

પઞ્ચમં પ્રકરણં સમાપ્તમ્ ।

---

૬ અથ સાર્ધાન્તિકજીવબ્રહ્મૈક્યવાક્યાનિ । (૩૮)

સ યશ્ચાયં પુરુષે ॥ ૧॥

તૈત્તિરીય ૨।૮।૩*

યશ્ચાસાવાદિત્યે ॥ ૨॥

તૈત્તિરીય ૨।૮।૩

સ એકઃ ॥ ૩॥

તૈત્તિરીય ૨।૮।૩

સત્યમાત્મા બ્રહ્મૈવ બ્રહ્માત્મૈવાત્ર હ્યેવ ન વિચિકિત્સ્યમ્ ॥ ૪॥

નૃસિંહતાપિની ૨।૯।૧

ત્વં બ્રહ્માસિ ॥ ૫॥

તેજોબિન્દુ ૫।૫૯*

અહં બ્રહ્માસ્મિ ॥ ૬॥

બૃહદારણ્યક ૧।૪।૧૦

આવયોરન્તરં ન વિદ્યતે ત્વમેવાહમહમેવ ત્વમ્ ॥૭॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૬*

ગતાઃ કલાઃ પઞ્ચદશપ્રતિષ્ઠા દેવાશ્ચ સર્વે પ્રતિદેવતાસુ ॥ ૮॥

મુણ્ડક ૩।૨।૭*

કર્માણિ વિજ્ઞાનમયશ્ચ આત્મા પરેઽવ્યયે સર્વ એકીભવન્તિ ॥ ૯॥

મુણ્ડક ૩।૨।૭

યેનેયતે શૃણોતીદં જિઘ્રતિ વ્યાકરોતિ ચ ॥ ૧૦॥

શુકરહસ્ય ૩।૧*

સ્વાદ્વસ્વાદુ વિજાનાતિ તત્પ્રજ્ઞાનમુદીરિતમ્ ॥ ૧૧॥

શુકરહસ્ય ૩।૧

ચતુર્મુખેન્દ્રદેવેષુ મનુષ્યાશ્વગવાદિષુ ॥ ૧૨॥

શુકરહસ્ય ૩।૨*

ચૈતન્યમેકં બ્રહ્માતઃ પ્રજ્ઞાનં બ્રહ્મ મય્યપિ ॥ ૧૩॥

શુકરહસ્ય ૩।૨

પરિપૂર્ણઃ પરાત્માસ્મિન્દેહે વિદ્યાધિકારિણિ ॥ ૧૪॥

શુકરહસ્ય ૩।૩*

બુદ્ધેઃ સાક્ષિતયા સ્થિત્વા સ્ફુરન્નહમિતીર્યતે ॥ ૧૫॥

શુકરહસ્ય ૩।૩

સ્વતઃ પૂર્ણઃ પરાત્માત્ર બ્રહ્મશબ્દેન વર્ણિતઃ ॥ ૧૬॥

શુકરહસ્ય ૩।૪*

અસ્મીત્યૈક્યપરામર્શાત્તેન બ્રહ્મ ભવામ્યહમ્ ॥ ૧૭॥

શુકરહસ્ય ૩।૪

એકમેવાદ્વિતીયં સન્નામરૂપવિવર્જિતમ્ ॥ ૧૮॥

શુકરહસ્ય ૩।૫*

સૃષ્ટેઃ પુરાધુનાપ્યસ્ય તાદૃક્ ત્વં તદિતીર્યતે ॥ ૧૯॥

શુકરહસ્ય ૩।૫

શ્રોતુર્દેહેન્દ્રિયાતીતં વસ્ત્વત્ર ત્વંપદેરિતમ્ ॥ ૨૦॥

શુકરહસ્ય ૩।૬*

એકતા ગ્રાહ્યતેઽસીતિ તદૈક્યમનુભૂયતામ્ ॥ ૨૧॥

શુકરહસ્ય ૩।૬

સ્વપ્રકાશાપરોક્ષત્વમયમિત્યુક્તિતો મતમ્ ॥ ૨૨॥

શુકરહસ્ય ૩।૭*

અહઙ્કારાદિદેહાન્તાત્પ્રત્યગાત્મેતિ ગીયતે ॥ ૨૩॥

શુકરહસ્ય ૩।૭

દૃશ્યમાનસ્ય સર્વસ્ય જગતસ્તત્ત્વમીર્યતે ॥ ૨૪॥

શુકરહસ્ય ૩।૮*

બ્રહ્મશબ્દેન તદ્બ્રહ્મ સ્વપ્રકાશાત્મરૂપકમ્ ॥ ૨૫॥

શુકરહસ્ય ૩।૮

માયાવિદ્યે વિહાયૈવ ઉપાધી પરજીવયોઃ ॥ ૨૬॥

અધ્યાત્મ ૩૨*

અખણ્ડં સચ્ચિદાનન્દં પરં બ્રહ્મ વિલક્ષ્યતે ॥ ૨૭॥

અધ્યાત્મ ૩૨

હકારઃ ખેચરીપ્રોક્તસ્ત્વંપદં ચેતિ નિશ્ચિતમ્ ॥ ૨૮॥

યોગચૂડામણિ ૮૨

હકારઃ પરમેશઃ સ્યાત્તત્પદં ચેતિ નિશ્ચિતમ્ ॥ ૨૯॥

યોગચૂડામણિ ૮૩

સકારો ધ્યાયતે જન્તુર્હકારો હિ ભવેદ્ધ્રુવમ્ ॥ ૩૦॥

યોગચૂડામણિ ૮૩

આદ્યો રા તત્પદાર્થઃ સ્યાન્મકારસ્ત્વંપદાર્થવાન્ ॥ ૩૧॥

રામરહસ્ય ૫।૧૨

તયોઃ સંયોજનમસીત્યર્થે તત્ત્વવિદો વિદુઃ ॥ ૩૨॥

રામરહસ્ય ૫।૧૩

નમસ્ત્વમર્થો વિજ્ઞેયો રામસ્તત્પદમુચ્યતે ॥ ૩૩॥

રામરહસ્ય ૫।૧૩

અસીત્યર્થે ચતુર્થી સ્યાદેવં મન્ત્રેષુ યોજયેત્ ॥ ૩૪॥

રામરહસ્ય ૫।૧૪

ક્ષીરં ક્ષીરે યથા ક્ષિપ્તં તૈલં તૈલે જલં જલે ॥ ૩૫॥

આત્મ ૨૩*

સંયુક્તમેકતાં યાતિ તથાત્મન્યાત્મવિન્મુનિઃ ॥ ૩૬॥

આત્મ ૨૪

યથા વ્યોમ વ્યોમૈવ ભવતિ સ્વયમ્ ॥ ૩૭॥

આત્મ ૨૨*

તથૈવોપાધિવિલયે બ્રહ્મૈવ બ્રહ્મવિત્સ્વયમ્ ॥ ૩૮॥

આત્મ ૨૩

ઇતિ સાર્ધાન્તિકજીવબ્રહ્મૈક્યવાક્યાન્યષ્ટત્રિંશત્ ॥ ૩૮॥

ષષ્ઠં પ્રકરણં સમાપ્તમ્ ।

---

૭ અથ સાર્ધાન્તિકમનનવાક્યાનિ । (૩૯)

અહમન્નમહમન્નમહમન્નમ્ ॥ ૧॥

તૈત્તિરીય ૩।૧૦।૬*

અહમન્નાદોઽહમન્નાદોઽહમન્નાદઃ ॥ ૨॥

તૈત્તિરીય ૩।૧૦।૬

અહં મનુરભવં સૂર્યશ્ચ ॥ ૩॥

બૃહદારણ્યક ૧।૪।૧૦*

અહમેવેદં સર્વમસાનિ ॥ ૪॥

છાન્દોગ્ય ૫।૨।૬*

યથા ફેનતરઙ્ગાદિ સમુદ્રાદુત્થિતં પુનઃ ॥ ૫॥

જાબાલદર્શન ૫।૧૦।૬*

સમુદ્રે લીયતે તદ્વજ્જગન્મય્યનુલીયતે ॥ ૬॥

જાબાલદર્શન ૫।૧૦।૭

અનાત્મદૃષ્ટેરવિવેકનિદ્રામહંમમસ્વપ્નગતિં ગતોઽહમ્ ॥ ૭॥

શુકરહસ્ય ૩।૯*

સ્વરૂપસૂર્યેઽભ્યુદિતે સ્ફુટોક્તૈર્ગુરોર્મહાવાક્યપદૈઃ પ્રબુદ્ધઃ ॥ ૮॥

શુકરહસ્ય ૩।૯

પ્રાણાશ્ચલન્તુ તદ્ધર્મૈઃ કામૈર્વા હન્યતાં મનઃ ॥ ૯॥

આત્મબોધ ૨૦*

આનન્દબુદ્ધિપૂર્ણસ્ય મમ દુઃખં કથં ભવેત્ ॥ ૧૦॥

આત્મબોધ ૨૦

ન મે બન્ધો ન મે મુક્તિર્ન મે શાસ્ત્રં ન મે ગુરુઃ ॥ ૧૧॥

આત્મબોધ ૧૯*

માયામાત્રવિકાસત્વાન્માયાતીતોઽહમદ્વયઃ ॥ ૧૨॥

આત્મબોધ ૧૯

આત્માનમઞ્જસા વેદ્મિ ક્વાપ્યજ્ઞાનં પલાયિતમ્ ॥ ૧૩॥

આત્મબોધ ૨૧*

કર્તૃત્વમપિ મે નષ્ટં કર્તવ્યં વાપિ ન ક્વચિત્ ॥ ૧૪॥

આત્મબોધ ૨૧

બ્રાહ્મણ્યં કુલગોત્રે ચ નામસૌન્દર્યજાતયઃ ॥ ૧૫॥

આત્મબોધ ૨૨*

સ્થૂલદેહગતા હ્યેતે સ્થૂલાદ્ભિન્નસ્ય મે ન હિ ॥ ૧૬॥

આત્મબોધ ૨૨

ક્ષુત્પિપાસાન્ધ્યબાધિર્યકામક્રોધાદયોઽખિલાઃ ॥ ૧૭॥

આત્મબોધ ૨૩*

લિઙ્ગદેહગતા હ્યેતે હ્યલિઙ્ગસ્ય ન વિદ્યતે ॥ ૧૮॥

આત્મબોધ ૨૩

જડત્વપ્રિયમોદત્વધર્માઃ કારણદેહગાઃ ॥ ૧૯॥

આત્મબોધ ૨૪*

ન સન્તિ મમ નિત્યસ્ય નિર્વિકારસ્વરૂપિણઃ ॥ ૨૦॥

આત્મબોધ ૨૪

ચિદ્રૂપત્વાન્ન મે જાડ્યં સત્યત્વાન્નાનૃતં મમ ॥ ૨૧॥

આત્મબોધ ૩૦*

આનન્દત્વાન્ન મે દુઃખમજ્ઞાનાદ્ભાતિ સત્યવત્ ॥ ૨૨॥

આત્મબોધ ૩૦

નાહં દેહો જન્મમૃત્યૂ કુતો મે નાહં પ્રાણઃ ક્ષુત્પિપાસે કુતો મે ॥ ૨૩॥

સર્વસાર ૬*

નાહં ચેતઃ શોકમોહૌ કુતો મે નાહં કર્તા બન્ધમોક્ષૌ કુતો મે ॥ ૨૪॥

સર્વસાર ૬*

આનન્દમન્તર્નિજમાશ્રયન્તમાશાપિશાચીમવમાનયન્તમ્ ॥ ૨૫॥

મૈત્રેયી ૧।૧૨*

આલોકયન્તં જગદિન્દ્રજાલમાપત્કથં માં પ્રવિશેદસઙ્ગમ્ ॥ ૨૬॥

મૈત્રેયી ૧।૧૨

દેવાર્ચનસ્નાનશૌચભિક્ષાદૌ વર્તતાં વપુઃ ॥ ૨૭॥

આરુણિક ૨૪*

તારં જપતુ વાક્ તદ્વત્પઠત્વામ્નાયમસ્તકમ્ ॥ ૨૮॥

આરુણિક ૨૪

વિષ્ણું ધ્યાયેત ધીર્યદ્વા બ્રહ્માનન્દે વિલીયતામ્ ॥ ૨૯॥

આરુણિક ૨૫

સાક્ષ્યહં કિઞ્ચિદપ્યત્ર ન કુર્વે નાપિ કારયે ॥ ૩૦॥

આરુણિક ૨૫

જ્ઞાતં જ્ઞાતવ્યમધુના દૃષ્ટં દ્રષ્ટવ્યમદ્ભુતમ્ ॥ ૩૧॥

મહા ૫।૫૮*

વિશ્રાન્તોઽસ્મિ ચિરં શ્રાન્તશ્ચિન્માત્રાન્નાસ્તિ કિઞ્ચન ॥ ૩૨॥

મહા ૫।૫૯

ન ભૂતં ન ભવિષ્યં ચ ચિન્તયામિ કદાચન ॥ ૩૩॥

અન્નપૂર્ણા ૫।૫૭*

ન સ્તૌમિ ન ચ નિન્દામિ હ્યાત્મનોઽન્યન્નહિ ક્વચિત્ ॥ ૩૪॥

અન્નપૂર્ણા ૫।૫૯

અલેપકોઽહમજરો નીરાગઃ શાન્તવાસનઃ ॥ ૩૫॥

અન્નપૂર્ણા ૫।૯૨*

સ્વપૂર્ણાત્માતિરેકેણ જગજ્જીવેશ્વરાદયઃ ॥ ૩૬॥

વરાહ ૨।૧૧

ન સન્તિ નાસ્તિ માયા ચ તેભ્યશ્ચાહં વિલક્ષણઃ ॥ ૩૭॥

વરાહ ૨।૧૧

કિં કરોમિ ક્વ ગચ્છામિ કિં ગૃહ્ણામિ ત્યજામિ કિમ્ ॥ ૩૮॥

૨।૩૫*

યન્મયા પૂરિતં વિશ્વં મહાકલ્પામ્બુના યથા ॥ ૩૯॥

વરાહ ૨।૩૫

ઇતિ સાર્ધાન્તિકમનનવાક્યાન્યેકોનચત્વારિંશત્ ॥ ૩૯॥

સપ્તમં પ્રકરણં સમાપ્તમ્ ।

---

૮ અથ સાર્ધાન્તિકજીવન્મુક્તિવાક્યાનિ । (૧૧૯)

સ તત્ર પર્યેતિ જક્ષત્ક્રીડન્ રમમાણઃ સ્ત્રીભિર્વા યાનૈર્વા
જ્ઞાતિભિર્વા વયસ્યૈર્વા નોપજનં સ્મરન્નિદં શરીરમ્ ॥

છાન્દોગ્ય ૮।૧૨।૩*

સ વા એષ એવં પશ્યન્નેવં મન્વાન એવં વિજાનન્નાત્મરતિ-
રાત્મક્રીડઃ આત્મમિથુન આત્માનન્દઃ સ્વરાડ્ ભવતિ ॥ ૨॥

છાન્દોગ્ય ૭।૧૫।૪*

તે દેવાઃ પુત્રૈષણાયાશ્ચ વિત્તૈષણાયાશ્ચ લોકૈષણાયાશ્ચ
સસાધનેભ્યો વ્યુત્થાય નિરાગારા નિષ્પરિગ્રહા અશિખા અયજ્ઞોપવીતા
અન્ધા બધિરા મુગ્ધાઃ ક્લીબા મૂકા ઉન્મત્તા ઇવ પરિવર્તમાનાઃ શાન્તા
દાન્તા ઉપરતાસ્તિતિક્ષવઃ । સમાહિતા આત્મરતય આત્મક્રીડા આત્મમિથુના
આત્માનન્દાઃ પ્રણવમેવ પરં બ્રહ્માત્મપ્રકાશં શૂન્યં
જાનન્તસ્તત્રૈવ પરિસમાપ્તાઃ ॥ ૩॥

કુચેલોऽસહાય એકાકી સમાધિસ્થ આત્મકામ આપ્તકામો નિષ્કામો
જીર્ણકામો હસ્તિનિ સિંહે દંશે મશકે નકુલે સપરાક્ષસગન્ધર્વેષુ
મૃત્યો રૂપાણિ વિદિત્વા ન બિભેતિ કુતશ્ચનેતિ ॥ ૪॥

શરણમુપગમ્યતત્ત્વમસિ સર્વં ખલ્વિદં બ્રહ્મ નેહ નાનાસ્તિ
કિઞ્ચનેત્યાદિ મહાવાક્યાર્થાનુભવજ્ઞાનાદ્બ્રહ્મૈવાહમસ્મીતિ નિશ્ચિત્ય
નિર્વિકલ્પસમાધિના સ્વતન્ત્રો યતિશ્ચરતિ સ સંન્યાસી સ મુક્તઃ સ પૂજ્યઃ
સ યોગી સ પરમહંસઃ સોऽવધૂતઃ સ બ્રાહ્મણ ઇતિ ॥ ૫॥

નિરલમ્બ*

જીવઃ પઞ્ચવિંશકઃ સ્વકલ્પિતચતુર્વિંશતિતત્ત્વં પરિત્યજ્ય
ષડ્વિંશકપરમાત્માહમિતિ નિશ્ચયાજ્જીવન્મુક્તો ભવતિ ॥ ૬॥

મણ્ડલબ્રાહ્મણ ૧।૪

તુરીયમક્ષરમિતિ જ્ઞાત્વા જાગરિતે સુષુપ્ત્યવસ્થાપન્ન ઇવ
યદ્યચ્છ્રુતં યદ્યદ્દૃષ્ટં તત્સર્વમવિજ્ઞાતમિવ યો વસેત્તસ્ય
સ્વપ્નાવસ્થાયામપિ તાદૃગવસ્થા ભવતિ સ જીવન્મુક્તો ભવતિ ॥ ૭॥

નારદપરિવ્રાજક ૫।*

સકૃદ્વિભાતસદાનન્દાનુભવૈકગોચરો બ્રહ્મવિદ્વિદ્વાંશ્ચક્ષુરાદિ
બાહ્યપ્રપઞ્ચોપરતઃ સર્વં જગદાત્મત્વેન પશ્યન્નાત્મેતિ ભાવયન્
કૃતકૃત્યો ભવતિ ॥ ૮॥

મણ્ડલબ્રાહ્મણ ૨।૩*

નિર્દ્વન્દ્વઃ સદાऽચઞ્ચલગાત્રઃ પરમશાન્તિં સ્વીકૃત્ય નિત્યશુદ્ધઃ
પરમાત્માહમેવેત્યખણ્ડાનન્દઃ પૂર્ણઃ કૃતાર્થઃ પરિપૂર્ણ-
પરમાકાશમગ્નમનાઃ પ્રાપ્તોન્મન્યવસ્થઃ સન્ન્યસ્તસર્વેન્દ્રિયવર્ગોऽનેક-
જન્માર્જિતપુણ્યપુઞ્જપરિપક્વ-
કૈવલ્યફલોऽખણ્ડાનન્દનિરસ્તસર્વક્લેશકશ્મલો બ્રહ્માહમસ્મીતિ
કૃતકૃત્યો ભવતિ ॥ ૯॥

મણ્ડલબ્રાહ્મણ ૩।૧*

બ્રહ્મૈવાહમસ્મીત્યનવરતં બ્રહ્મપ્રણવાનુસન્ધાનેન યઃ કૃતકૃત્યો
ભવતિ સ પરમહંસપરિવ્રાટ્ ॥ ૧૦॥

પરમહંસપરિવ્રાજક*

????ભાવાભાવકલાવિનિર્મુક્તઃ સર્વસંશયધ્વસ્તઃ પૂર્ણાહંભાવઃ
કૃતકૃત્યો ભવતિ ॥ ૧૧॥ ????

????

પ્રાણો હ્યેષ સર્વભૂતૈર્વિભાતિ વિજાનન્વિદ્વાન્ભવતે નાતિવાદી ॥ ૧૨॥

મુણ્ડક ૩।૧।

આત્મક્રીડ આત્મરતિઃ ક્રિયાવાનેષ બ્રહ્મવિદાં વરિષ્ઠઃ ॥ ૧૩॥

મુણ્ડક ૩।૧।૪

નિમિષાર્ધં ન તિષ્ઠન્તિ વૃત્તિં બ્રહ્મમયીં વિના ॥

તારસાર ૧।૪૭*

યથા તિષ્ઠન્તિ બ્રહ્માદ્યાઃ સનકાદ્યાઃ શુકાદયઃ ॥ ૧૫॥

તારસાર ૧।૪૭

અધ્યાત્મરતિરાસીનો નિરપેક્ષો નિરાશિષઃ ॥ ૧૬॥

નારદપરિવ્રાજક ૩।૪૪*

સર્વદ્વન્દ્વૈર્વિનિર્મુક્તો બ્રહ્મણ્યેવાવતિષ્ઠતે ॥ ૧૭॥

નારદપરિવ્રાજક ૩।૫૨

કપાલં વૃક્ષમૂલાનિ કુચેલાન્યસહાયતા ॥ ૧૮॥

નારદપરિવ્રાજક ૩।૫૪*

સમતા ચૈવ સર્વસ્મિન્નેતન્મુક્તસ્ય લક્ષણમ્ ॥ ૧૯॥

નારદપરિવ્રાજક ૩।૫૪

સ્વપ્નેઽપિ યોઽભિયુક્તઃ સ્યાજ્જાગ્રતીવ વિશેષતઃ ॥ ૨૦॥

નારદપરિવ્રાજક ૫।૫

ઈદૃક્ચેષ્ટઃ સ્મૃતઃ શ્રેષ્ઠો વરિષ્ઠો બ્રહ્મવાદિનામ્ ॥ ૨૧॥

નારદપરિવ્રાજક ૫।૫

નિર્માનશ્ચાનહઙ્કારો નિર્દ્વન્દ્વશ્છિન્નસંશયઃ ॥ ૨૨॥

નારદપરિવ્રાજક ૫।૧૭

આત્મક્રીડ આત્મરતિરાત્મવાન્ સમદર્શનઃ ॥ ૨૩॥

નારદપરિવ્રાજક ૫।૨૫

સ્મૃત્વા સ્પૃષ્ટ્વા ચ ભુક્ત્વા ચ દૃષ્ટ્વા જ્ઞાત્વા

શુભાશુભમ્ ॥ ૨૪॥

મહા ૪।૩૨

ન હૃષ્યતિ ગ્લાયતિ યઃ સ વિજ્ઞેયો જિતેન્દ્રિયઃ ॥ ૨૫॥

નારદપરિવ્રાજક ૩।૩૮

અપ્રાપ્તં હિ પરિત્યજ્ય સમ્પ્રાપ્તે સમતાં ગતઃ ॥ ૨૬॥

મહા ૪।૩૬*

અદૃષ્ટખેદાખેદો યઃ સન્તુષ્ટ ઇતિ કથ્યતે ॥ ૨૭॥

મહા ૪।૩૬

નાકૃતેન કૃતેનાર્થો ન શ્રુતિસ્મૃતિવિભ્રમૈઃ ॥ ૨૮॥

મહા ૪।૪૧

નિર્મન્દર ઇવામ્ભોધિઃ સ તિષ્ઠતિ યથા સ્થિતઃ ॥ ૨૯॥

મહા ૪।૪૧

સમ્યગ્જ્ઞાનાવબોધેન નિત્યમેકસમાધિના ॥ ૩૦॥

અન્નપૂર્ણા ૫।૪૯

સાઙ્ખ્ય એવાવબુદ્ધા યે તે સાઙ્ખ્યા યોગિનઃ સ્મૃતાઃ ॥ ૩૧॥

અન્નપૂર્ણા ૫।૪૯

પ્રાણાદ્યનિલસંશાન્તૌ યુક્ત્યા યે પદમાગતાઃ ॥ ૩૨॥

અન્નપૂર્ણા ૫।૫૦

અનામયમનાદ્યન્તં તે સ્મૃતા યોગયોગિનઃ ॥ ૩૩॥

અન્નપૂર્ણા ૫।૫૦

સુખદુઃખદશાધીરં સામ્યાન્ન પ્રોદ્ધરન્તિ યમ્ ॥ ૩૪॥

અન્નપૂર્ણા ૪।૧૨

નિઃશ્વાસા ઇવ શૈલેન્દ્રં ચિત્તં તસ્ય મૃતં વિદુઃ ॥ ૩૫॥

અન્નપૂર્ણા ૪।૧૨

વાચામતીતવિષયો વિષયાશાદશોજ્ઝિતઃ ॥ ૩૬॥

અન્નપૂર્ણા ૫।૯૬

પરાનન્દરસાક્ષુબ્ધો રમતે સ્વાત્મનાત્મનિ ॥ ૩૭॥

અન્નપૂર્ણા ૫।૯૬

નિર્ગ્રન્થિઃ શાન્તસન્દેહો જીવન્મુક્તો વિભાવનઃ ॥ ૩૮॥

અક્ષિ ૩૯

અનિર્વાણોઽપિ નિર્વાણશ્ચિત્પ્રદીપ ઇવ સ્થિતઃ ॥ ૩૯॥

અક્ષિ ૩૯

નિર્ધનોઽપિ સદા તુષ્ટોઽપ્યસહાયો મહાબલઃ ॥ ૪૦॥

આત્મ ૧૨

નિત્યતૃપ્તોઽપ્યભુઞ્જાનોઽપ્યસમઃ સમદર્શનઃ ॥ ૪૧॥

આત્મ ૧૩

કુર્વન્નપિ ન કુર્વાણશ્ચાભોક્તા ફલભોગ્યપિ ॥ ૪૨॥

આત્મ ૧૩

શરીરપ્યશરીરોઽસૌ પરિચ્છિન્નોઽપિ સર્વગઃ ॥ ૪૩॥

આત્મ ૧૪

અધ્યાત્મરતિરાશાન્તઃ પૂર્ણઃ પાવનમાનસઃ ॥ ૪૪॥

અન્નપૂર્ણા ૨।૨૬

નૈષ્કર્મણ્યેન ન તસ્યાર્થસ્તસ્યાર્થોઽસ્તિ ન કર્મભિઃ ॥ ૪૫॥ મુક્તિકા ૨।૨૦

ન સમાધાનજાપ્યાભ્યાં યસ્ય નિર્વાસનં મનઃ ॥ ૪૬॥

મુક્તિકા ૨।૨૦

જગજ્જીવાદિરૂપેણ પશ્યન્નપિ પરાત્મવિત્ ॥ ૪૭॥

પાશુપતબ્રહ્મ ૨૪

ન તત્પશ્યતિ ચિદ્રૂપં બ્રહ્મ વસ્ત્વેવ પશ્યતિ ॥ ૪૮॥

પાશુપતબ્રહ્મ ૨૫

અહમન્નં સદાન્નાદ ઇતિ હિ બ્રહ્મવેદનમ્ ॥ ૪૯॥

પાશુપતબ્રહ્મ ૩૮

બ્રહ્મવિદ્ગ્રસતિ જ્ઞાનાત્ સર્વં બ્રહ્માત્મનૈવ તુ ॥ ૫૦॥

પાશુપતબ્રહ્મ ૩૯

સમાધિમથકર્માણિ મા કરોતુ કરોતુ વા ॥ ૫૧॥

મુક્તિકા ૨।૧૯

હૃદયેનાત્તસર્વેહો મુક્ત એવોત્તમાશયઃ ॥ ૫૨॥

મુક્તિકા ૨।૧૯

અક્ષરત્વાદ્વરેણ્યત્વાદ્વ્યસ્તસંસારબન્ધનાત્ ॥ ૫૩॥

આરુણિક ૧

તત્ત્વમસ્યાદિલક્ષ્યત્વાદવધૂત ઇતીર્યતે ॥ ૫૪॥

આરુણિક ૧

યો વિલઙ્ઘ્યાશ્રમાન્વર્ણાનાત્મન્યેવ સ્થિતઃ પુમાન્ ॥ ૫૫॥

આરુણિક ૨

અતિવર્ણાશ્રમી યોગી અવધૂતઃ સ કથ્યતે ॥ ૫૬॥

આરુણિક ૨

યથા રવિઃ સર્વરસાન્પ્રભુઙ્ક્તે હુતાશનશ્ચાપિ હિ સર્વભક્ષઃ ॥ ૫૭॥

આરુણિક ૬

તથૈવ યોગી વિષાયન્પ્રભુઙ્ક્તે ન લિપ્યતે પુણ્યપાપૈશ્ચ શુદ્ધઃ ॥ ૫૮॥

આરુણિક ૬

કેવલં સુસમઃ સ્વચ્છો મૌની મુદિતમાનસઃ ॥ ૫૯॥

મહા ૨।૨૭

સન્તોષામૃતપાનેન યે શાન્તાસ્તૃપ્તિમાગતાઃ ॥ ૬૦॥

મહા ૪।૩૫

આત્મારામા મહાત્માનસ્તે મહાપદમાગતાઃ ॥ ૬૧॥

મહા ૪।૩૫

હર્ષામર્ષભયક્રોધકામકાર્પણ્યદૃષ્ટિભિઃ ॥ ૬૨॥

મહા ૨।૪૪

ન હૃષ્યતિ ગ્લાયતિ યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૩॥

મહા ૨।૪૩

અહઙ્કારમયીં ત્યક્ત્વા વાસનાં લીલયૈવ યઃ ॥ ૬૪॥

મહા ૨।૪૫

તિષ્ઠતિ ધ્યેયસન્ત્યાગી સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૫॥

મહા ૨।૪૫

મૌનવાન્નિરહંભાવો નિર્માનો મુક્તમત્સરઃ ॥ ૬૬॥

મહા ૨।૫૦*

યઃ કરોતિ ગતોદ્વેગઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૭॥

મહા ૨।૫૦

યાવતી દૃશ્યકલના સકલેયં વિલોક્યતે ॥ ૬૮॥

મહા ૨।૫૩

સા યેન સુષ્ઠુ સન્ત્યક્તા સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૯॥

મહા ૨।૫૩

ઉદ્વેગાનન્દરહિતઃ સમયા સ્વચ્છયા ધિયા ॥ ૭૦॥

મહા ૨।૫૭

ન શોચતે ન ચોદેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૧॥

મહા ૨।૫૭

સર્વેચ્છાઃ સકલાઃ શઙ્કાઃ સર્વેહાઃ સર્વનિશ્ચયાઃ ॥ ૭૨॥ મહા ૨।૫૮*

ધિયા યેન પરિત્યક્તાઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૩॥

મહા ૨।૫૮

જન્મસ્થિતિવિનાશેષુ સોદયાસ્તમયેષુ ચ ॥ ૭૪॥

મહા ૨।૫૯*

સમમેવ મનો યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૫॥

મહા ૨।૫૯

સર્વાધિષ્ઠાનચિન્માત્રે નિર્વિકલ્પે ચિદાત્મનિ ॥ ૭૬॥

અન્નપૂર્ણા ૨।૨૭

યો જીવતિ ગતસ્નેહઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૭॥

અન્નપૂર્ણા ૨।૨૭

ક્રિયાનાશાદ્ભવેચ્ચિન્તાનાશોઽસ્માદ્વાસનાક્ષયઃ ॥ ૭૮॥

અધ્યાત્મ ૧૨*

વાસનાપ્રક્ષયો મોક્ષઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૭૯॥

અધ્યાત્મ ૧૨

નિર્વિકલ્પા ચ ચિન્માત્રા વૃત્તિઃ પ્રજ્ઞેતિ કથ્યતે ॥ ૮૦॥

અધ્યાત્મ ૪૪

સા સર્વદા ભવેદ્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૧॥

અધ્યાત્મ ૪૪

દેહેન્દ્રિયેષ્વહંભાવ ઇદંભાવસ્તદન્યકે ॥ ૮૨॥

અધ્યાત્મ ૪૫*

યસ્ય નો ભવતઃ ક્વાપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૩॥

અધ્યાત્મ ૪૫

ન પ્રત્યગ્બ્રહ્મણોર્ભેદં કદાપિ બ્રહ્મસર્ગયોઃ ॥ ૮૪॥

અધ્યાત્મ ૪૬*

પ્રજ્ઞયા યો વિજાનાતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૫॥

અધ્યાત્મ ૪૬

સાધુભિઃ પૂજ્યમાનોઽપિ પીડ્યમાનોઽપિ દુર્જનૈઃ ॥ ૮૬॥

અધ્યાત્મ ૪૭*

સમભાવો ભવેદ્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૭॥

અધ્યાત્મ ૪૭

યથાસ્થિતમિદં યસ્ય વ્યવહારવતોઽપિ ચ ॥ ૮૮॥

વરાહ ૪।૨૧

અસ્તં ગતં સ્થિતં વ્યોમ સ જીવન્મુક્ત ઉચ્યતે ॥ ૮૯॥

વરાહ ૪।૨૧

નોદેતિ નાસ્તમાયાતિ સુખે દુઃખે મનઃપ્રભા ॥ ૯૦॥

વરાહ ૪।૨૨

યથા પ્રાપ્તસ્થિતિર્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૧॥

વરાહ ૪।૨૨

યો જાગર્તિ સુષુપ્તિસ્થો યસ્ય જાગ્રન્નવિદ્યતે ॥ ૯૨॥

વરાહ ૪।૨૩

યસ્ય નિર્વાસનો બોધઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૩॥

વરાહ ૪।૨૩

રાગદ્વેષભયાદીનામનુરૂપં ચરન્નપિ ॥ ૯૪॥

વરાહ ૪।૨૪*

યોઽન્તર્વ્યોમવદત્યચ્છઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૫॥

વરાહ ૪।૨૪

યસ્ય નાહઙ્કૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ॥ ૯૬॥

વરાહ ૪।૨૪

કુર્વતોઽકુર્વતો વાપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭॥

વરાહ ૪।૨૫

યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ॥ ૯૮॥

વરાહ ૪।૨૬

હર્ષામર્ષભયોન્મુક્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૯॥

વરાહ ૪।૨૬

યઃ સમસ્તાર્થજાલેષુ વ્યવહાર્યપિ શીતલઃ ॥ ૧૦૦॥

વરાહ ૪।૨૭

પરાર્થેષ્વિવ પૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૧॥

મહા ૨।૬૨

પ્રજહાતિ યદા કામાન્સર્વાંશ્ચિત્તગતાન્મુને ॥ ૧૦૨॥

વરાહ ૪।૨૮

મયિ સર્વાત્મકે તુષ્ટઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૩॥

વરાહ ૪।૨૮

ચૈત્યવર્જિતચિન્માત્રે પદે પરમપાવને ॥ ૧૦૪॥

વરાહ ૪।૨૯

અક્ષુબ્ધચિત્તો વિશ્રાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૫॥

વરાહ ૪।૨૯

ઇદં જગદયં સોઽહં દૃશ્યજાતમવાસ્તવમ્ ॥ ૧૦૬॥

વરાહ ૪।૩૦

યસ્ય ચિત્તે ન સ્ફુરતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૭॥

વરાહ ૪।૩૦

શાન્તસંસારકલનઃ કલાવાનપિ નિષ્કલઃ ॥ ૧૦૮॥

મહા ૨।૬૧

યઃ સચિત્તોઽપિ નિશ્ચિત્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૦૯॥

મહા ૨।૬૧

ચિદાત્માહં પરાત્માહં નિર્ગુણોઽહં પરાત્પરઃ ॥ ૧૧૦॥

તેજોબિન્દુ ૪।૧

આત્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૧॥

તેજોબિન્દુ ૪।૧

દેહત્રયાતિરિક્તોઽહં શુદ્ધચૈતન્યમસ્મ્યહમ્ ॥ ૧૧૨॥

તેજોબિન્દુ ૪।૨*

બ્રહ્માહમિતિ યસ્યાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૩॥

તેજોબિન્દુ ૪।૨

યસ્ય દેહાદિકં નાસ્તિ યસ્ય બ્રહ્મેતિ નિશ્ચયઃ ॥ ૧૧૪॥

તેજોબિન્દુ ૪।૩

પરમાનન્દપૂર્ણો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૫॥

તેજોબિન્દુ ૪।૩

નિત્યાનન્દઃ પ્રસન્નાત્મા હ્યન્યચિન્તાવિવર્જિતઃ ॥ ૧૧૬॥

તેજોબિન્દુ ૪।૬

કિઞ્ચિદસ્તિત્વહીનો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૭॥

તેજોબિન્દુ ૪।૭

અહં બ્રહ્માસ્મ્યહં બ્રહ્માસ્મ્યહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૧૧૮॥

તેજોબિન્દુ ૪।૨૯

ચિદહં ચિદહં ચેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૧૧૯॥

તેજોબિન્દુ ૪।૩૦

ઇતિ જીવન્મુક્તિવાક્યાન્યેકોનવિંશત્યધિકં શતમ્ ॥ ૧૧૯॥

અષ્ટમં પ્રકરણં સમાપ્તમ્ ।

૯ અથ સાર્ધાન્તિકસ્વાનુભૂતિવાક્યાનિ । (૧૧૮)
યોઽસાવસૌ પુરુષઃ સોઽહમસ્મિ ॥ ૧॥

ઈશ ૧૬

તદ્યોઽહં સોઽસૌ યોઽસૌ સોઽહમ્ ॥ ૨॥

બહ્વૃચ ૮

તં શાન્તમચલમદ્વયાનન્દચિદ્ઘન એવાસ્મિ ॥ ૩॥

પરમહંસ ૨

તત્પૂર્ણાનન્દૈકબોધસ્તદ્બ્રહ્મૈવાહમસ્મિ ॥ ૪॥

નારદપરિવ્રાજક ૩।૮૬

ત્વં વાહમસ્મિ ભગવો દેવ તેઽહં વૈ ત્વમસિ ॥ ૫॥

વરાહ ૨।૩૪

સચ્ચિદાનન્દાત્મકોઽહમજોઽહં પરિપૂર્ણોઽહમસ્મિ ॥ ૬॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૮

શુદ્ધાદ્વૈતબ્રહ્માહમ્ ॥ ૭॥

મણ્ડલબ્રાહ્મણ ૨।૪

વાચામગોચરનિરાકારપરબ્રહ્મસ્વરૂપોઽહમેવ ॥ ૮॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૮

સદોજ્જ્વલોઽવિદ્યાતત્કાર્યહીનઃ સ્વાત્મા બન્ધહરઃ સર્વદા દ્વૈતરહિત
આનન્દરૂપઃ સર્વાધિષ્ઠાનસન્માત્રો નિરસ્તાવિદ્યાતમોમોહોઽહમેવાહમોં
તદ્યત્પરં બ્રહ્મ રામચન્દ્રશ્ચિદાત્મકઃ સોઽહમોં તદ્રામભદ્રઃ
પરં જ્યોતી રસોઽહમોમ્ ॥ ૯॥

નૃસિંહતાપિની ૨।૧।૧

તત્પરઃ પરમપુરુષઃ પુરાણપુરુષોત્તમોનિત્યશુદ્ધબુદ્ધમુક્તસત્ય-
પરમાનન્દાનન્તાદ્વયપરિપૂર્ણઃ પરમાત્મા બ્રહ્મૈવાહં રામોઽસ્મિ ॥ ૧૦॥ તારસાર ૩।૮
ત્રિષુ ધામસુ યદ્ભોજ્યં ભોક્તા ભોગશ્ચ યદ્ભવેત્ ॥ ૧૧॥

કૈવલ્ય ૧।૧૮*

તેભ્યો વિલક્ષણઃ સાક્ષી ચિન્માત્રોઽહં સદાશિવઃ ॥ ૧૨॥

કૈવલ્ય ૧।૧૮

મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૩॥

કૈવલ્ય ૧।૧૯*

મયિ સર્વં લયં યાતિ તદ્બ્રહ્માદ્વયમસ્મ્યહમ્ ॥ ૧૪॥

કૈવલ્ય ૧।૧૯

નિર્વાણોઽસ્મિ નિરીહોઽસ્મિ નિરંશોઽસ્મિ નિરીપ્સિતઃ ॥ ૧૫॥

સન્ન્યાસ ૨।૫૬*

ચિદાત્માઽસ્મિ નિરંશોઽસ્મિ પરાપરવિવર્જિતઃ ॥ ૧૬॥

અન્નપૂર્ણા ૫।૧૩

બ્રહ્મૈવાહં સર્વવેદાન્તવેદ્યં નાહં વેદ્યં વ્યોમવાતાદિરૂપમ્ ॥ ૧૭॥

સર્વસાર ૫*

રૂપં નાહં નામ નાહં ન કર્મ બ્રહ્મૈવાહં સચ્ચિદાનન્દરૂપમ્ ॥ ૧૮॥

સર્વસાર ૫*

નિત્યઃ શુદ્ધો બુદ્ધમુક્તસ્વભાવઃ સત્યઃ સૂક્ષ્મઃ
સન્વિભુશ્ચાદ્વિતીયઃ ॥ ૧૯॥

મૈત્રેયી ૧।૧૧

આનન્દાબ્ધિર્યત્પરઃ સોઽહમસ્મિ પ્રત્યગ્ધાતુર્નાત્ર સંશીતિરસ્તિ ॥ ૨૦॥

મૈત્રેયી ૧।૧૧

સોઽહમર્કઃ પરં જ્યોતિરર્કજ્યોતિરહં શિવઃ ॥ ૨૧॥

મહાવાક્ય

આત્મજ્યોતિરહં શુક્રઃ સર્વજ્યોતિરસાવહોમ્ ॥ ૨૨॥

મહાવાક્ય

દ્વૈતભાવવિમુક્તોઽસ્મિ સચ્ચિદાનન્દલક્ષણઃ ॥ ૨૩॥

અન્નપૂર્ણા ૫।૬૮

શુદ્ધબોધસ્વરૂપોઽહં કેવલોઽહં સદાશિવઃ ॥ ૨૪॥

અધ્યાત્મ ૬૯

નિષ્ક્રિયોઽસ્મ્યવિકારોઽસ્મિ નિર્ગુણોઽસ્મિ નિરાકૃતિઃ ॥ ૨૫॥

કુણ્ડિકા ૨૫

નિર્વિકલ્પોઽસ્મિ નિત્યોઽસ્મિ નિરાલમ્બોઽસ્મિ નિર્દ્વયઃ ॥ ૨૬॥

કુણ્ડિકા ૨૫

કેવલાખણ્ડબોધોઽહં સ્વાનન્દોઽહં નિરન્તરઃ ॥ ૨૭॥

કુણ્ડિકા ૨૬

સત્યં જ્ઞાનમનન્તં યત્પરં બ્રહ્માહમેવ તત્ ॥ ૨૮॥

વરાહ ૩।૨

કેવલં ચિત્સદાનન્દં બ્રહ્મૈવાહં જનાર્દનઃ ॥ ૨૯॥

વરાહ ૩।૧૯

અશુભાશુભસઙ્કલ્પૈઃ સંશાન્તોઽસ્મિ નિરામયઃ ॥ ૩૦॥

સન્યાસ ૨।૪૯

નષ્ટેષ્ટાનિષ્ટકલનઃ સંવિન્માત્રપરોઽસ્મ્યહમ્ ॥ ૩૧॥

સન્યાસ ૨।૪૯

અન્તર્યામ્યહમગ્રાહ્યોઽનિર્દેશ્યોઽહમલક્ષણઃ ॥ ૩૨॥

બ્રહ્મવિદ્યા ૮૦

અદ્વૈતોઽહં પૂર્ણોઽહમબાહ્યોઽહમનન્તરઃ ॥ ૩૩॥

બ્રહ્મવિદ્યા ૮૮

અદ્વયાનન્દવિજ્ઞાનઘનોઽસ્મ્યહમવિક્રિયઃ ॥ ૩૪॥

બ્રહ્મવિદ્યા ૮૯

અવિદ્યાકાર્યહીનોઽહમવાઙ્મનસગોચરઃ ॥ ૩૫॥

બ્રહ્મવિદ્યા ૯૦

આત્મચૈતન્યરૂપોઽહમહમાનન્દચિદ્ઘનઃ ॥ ૩૬॥

બ્રહ્મવિદ્યા ૯૧

આપ્તકામોઽહમાકાશાત્પરમાત્મેશ્વરોઽસ્મ્યહમ્ ॥ ૩૭॥

બ્રહ્મવિદ્યા ૯૨

ચિદાનન્દોઽસ્મ્યહં ચેતા ચિદ્ઘનશ્ચિન્મયોઽસ્મ્યહમ્ ॥ ૩૮॥

બ્રહ્મવિદ્યા ૯૫

જ્યોતિર્મયોઽસ્મ્યહં જ્યાયાજ્જ્યોતિષાં જ્યોતિરસ્મ્યહમ્ ॥ ૩૯॥

બ્રહ્મવિદ્યા ૯૫

નિત્યોઽહં નિરવદ્યોઽહં નિષ્ક્રિયોઽમિ નિરઞ્જનઃ ॥ ૪૦॥

બ્રહ્મવિદ્યા ૯૭

નિર્મલો નિર્વિકલ્પોઽહં નિરાખ્યાતોઽસ્મિ નિશ્ચલઃ ॥ ૪૧॥

બ્રહ્મવિદ્યા ૯૭

નિર્વિકારો નિત્યપૂતો નિર્ગુણો નિસ્પૃહોઽસ્મ્યહમ્ ॥ ૪૨॥

બ્રહ્મવિદ્યા ૯૮

નિરિન્દ્રિયો નિયન્તાહં નિરપેક્ષોઽસ્મિ નિષ્કલઃ ॥ ૪૩॥

બ્રહ્મવિદ્યા ૯૮

પુરુષઃ પરમાત્માહં પુરાણઃ પરમોઽસ્મ્યહમ્ ॥ ૪૪॥

બ્રહ્મવિદ્યા ૯૯

પૂર્ણાનન્દૈકબોધોઽહં પ્રત્યગેકરસોઽસ્મ્યહમ્ ॥ ૪૫॥

બ્રહ્મવિદ્યા ૧૦૦

પ્રજ્ઞાતોઽહં પ્રશાન્તોઽહં પ્રકાશઃ પરમેશ્વરઃ ॥ ૪૬॥

બ્રહ્મવિદ્યા ૧૦૧

એકધા ચિન્ત્યમાનોઽહં દ્વૈતાદ્વૈતવિલક્ષણઃ ॥ ૪૭॥

બ્રહ્મવિદ્યા ૧૦૧

શુદ્ધોઽસ્મિ શુક્રઃ શાન્તોઽસ્મિ શાશ્વતોઽસ્મિ શિવોઽસ્મ્યહમ્ ॥ ૪૮॥

બ્રહ્મવિદ્યા ૧૦૪

અહં સકૃદ્વિભાતોઽસ્મિ સ્વે મહિમ્નિ સદા સ્થિતઃ ॥ ૪૯॥

બ્રહ્મવિદ્યા ૧૦૫

સચ્ચિદાનન્દમાત્રોઽહં સ્વપ્રકાશોઽસ્મિ ચિદ્ઘનઃ ॥ ૫૦॥

બ્રહ્મવિદ્ય ૧૦૯

માનાવમાનહીનોઽસ્મિ નિર્ગુણોઽસ્મિ શિવોઽસ્મ્યહમ્ ॥ ૫૧॥

મૈત્રેયી ૩।૪

દ્વૈતાદ્વૈતવિહીનોઽસ્મિ દ્વન્દ્વહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૫૨॥

મૈત્રેયી ૩।૪

ભાવાભાવવિહીનોઽસ્મિ ભાષાહીનોઽસ્મિ ભાસ્મ્યહમ્ ॥ ૫૩॥

મૈત્રેયી ૩।૫

શૂન્યાશૂન્યવિહીનોઽસ્મિ શોભનાશોભનોઽસ્મ્યહમ્ ॥ ૫૪॥

મૈત્રેયી ૩।૫

સદસદ્ભેદહીનોઽસ્મિ સઙ્કલ્પરહિતોઽસ્મ્યહમ્ ॥ ૫૫॥

મૈત્રેયી ૩।૭

નાનાત્મભેદહીનોઽસ્મિ હ્યખણ્ડાનન્દવિગ્રહઃ ॥ ૫૬॥

મૈત્રેયી ૩।૮

બન્ધમોક્ષવિહીનોઽસ્મિ શુદ્ધં બ્રહ્માસ્મિ સોઽસ્મ્યહમ્ ॥ ૫૭॥

મૈત્રેયી ૩।૯

ચિત્તાદિસર્વહીનોઽસ્મિ પરમોઽસ્મિ પરાત્પરઃ ॥ ૫૮॥

મૈત્રેયી ૩।૧૦

સદા વિચારરૂપોઽસ્મિ નિર્વિચારોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૫૯॥

મૈત્રેયી ૩।૧૦

ધ્યાતૃધ્યાનવિહીનોઽસ્મિ ધ્યેયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૬૦॥

મૈત્રેયી ૩।૧૧

લક્ષ્યાલક્ષ્યવિહીનોઽસ્મિ લયહીનરસોઽસ્મ્યહમ્ ॥ ૬૧॥

મૈત્રેયી ૩।૧૩

માતૃમાનવિહીનોઽસ્મિ મેયહીનઃ શિવોઽસ્મ્યહમ્ ॥ ૬૨॥

મૈત્રેયી ૩।૧૩

સર્વેન્દ્રિયવિહીનોઽસ્મિ સર્વકર્મકૃદપ્યહમ્ ॥ ૬૩॥

મૈત્રેયી ૩।૧૫

મુદિતામુદિતાખ્યોઽસ્મિ સર્વમૌનફલોઽસ્મ્યહમ્ ॥ ૬૪॥

મૈત્રેયી ૩।૧૬

ષડ્વિકારવિહીનોઽસ્મિ ષટ્કોશરહિતોઽસ્મ્યહમ્ ॥ ૬૫॥

મૈત્રેયી ૩।૧૮

દેશકાલવિમુક્તોઽસ્મિ દિગમ્બરસુખોઽસ્મ્યહમ્ ॥ ૬૬॥

મૈત્રેયી ૩।૧૯

અખણ્ડાકાશરૂપોઽસ્મિ હ્યખણ્ડાકારમસ્મ્યહમ્ ॥ ૬૭॥

મૈત્રેયી ૩।૨૦

પ્રપઞ્ચમુક્તચિત્તોઽસ્મિ પ્રપઞ્ચરહિતોઽસ્મ્યહમ્ ॥ ૬૮॥

મૈત્રેયી ૩।૨૦

સર્વપ્રકાશરૂપોઽસ્મિ ચિન્માત્રજ્યોતિરસ્મ્યહમ્ ॥ ૬૯॥

મૈત્રેયી ૩।૨૧

કાલત્રયવિમુક્તોઽસ્મિ કામાદિરહિતોઽસ્મ્યહમ્ ॥ ૭૦॥

મૈત્રેયી ૩।૨૧

મુક્તિહીનોઽસ્મિ મુક્તોઽસ્મિ મોક્ષહીનોઽસ્મ્યહમ્ સદા ॥ ૭૧॥

મૈત્રેયી ૩।૨૨

ગન્તવ્યદેશહીનોઽસ્મિ ગમનાદિવિવર્જિતઃ ॥ ૭૨॥

મૈત્રેયી ૩।૨૩

સર્વદા સમરૂપોઽસ્મિ શાન્તોઽસ્મિ પુરુષોત્તમઃ ॥ ૭૩॥

મૈત્રેયી ૩।૨૪

ચિદક્ષરોઽહં સત્યોઽહં વાસુદેવોઽજરોઽમરઃ ॥ ૭૪॥

તેજોબિન્દુ ૬।૬૯

અહમેવાક્ષરં બ્રહ્મ વાસુદેવાખ્યમદ્વયમ્ ॥ ૭૫॥

નારદપરિવ્રાજક ૩।૨૦

પરબ્રહ્મસ્વરૂપોઽહં પરમાનન્દમસ્મ્યહમ્ ॥ ૭૬॥

તેજોબિન્દુ ૩।૧

કેવલં જ્ઞાનરૂપોઽહં કેવલં પરમોઽસ્મ્યહમ્ ॥ ૭૭॥

તેજોબિન્દુ ૩।૧

કેવલં શાન્તરૂપોઽહં કેવલં ચિન્મયોઽસ્મ્યહમ્ ॥ ૭૮॥

તેજોબિન્દુ ૩।૨

કેવલં નિત્યરૂપોઽહં કેવલં શાશ્વતોઽસ્મ્યહમ્ ॥ ૭૯॥

તેજોબિન્દુ ૩।૨

કેવલં સત્ત્વરૂપોઽહમહં ત્યક્ત્વાહમસ્મ્યહમ્ ॥ ૮૦॥

તેજોબિન્દુ ૩।૩

કેવલં તુર્યરૂપોઽસ્મિ તુર્યાતીતોઽસ્મિ કેવલઃ ॥ ૮૧॥

તેજોબિન્દુ ૩।૪

કેવલાકારરૂપોઽસ્મિ શુદ્ધરૂપોઽસ્મ્યહં સદા ॥ ૮૨॥

તેજોબિન્દુ ૩।૫

નિર્વિકલ્પસ્વરૂપોઽસ્મિ નિરીહોઽસ્મિ નિરામયઃ ॥ ૮૩॥

તેજોબિન્દુ ૩।૬

અપરિચ્છિન્નરૂપોઽસ્મિ હ્યનન્તાનન્દરૂપવાન્ ॥ ૮૪॥

તેજોબિન્દુ ૩।૭

આત્મારામસ્વરૂપોઽસ્મિ અહમાત્મા સદાશિવઃ ॥ ૮૫॥

તેજોબિન્દુ ૩।૯

આદિમધ્યાન્તશૂન્યોઽસ્મિ હ્યાકાશસદૃશોઽસ્મ્યહમ્ ॥ ૮૬॥

તેજોબિન્દુ ૩।૧૦

નિત્યશુદ્ધચિદાનન્દઃ સત્તામાત્રોઽહમવ્યયઃ ॥ ૮૭॥

તેજોબિન્દુ ૩।૧૧

નિત્યબુદ્ધવિશુદ્ધૈકઃ સચ્ચિદાનન્દમસ્મ્યહમ્ ॥ ૮૮॥

તેજોબિન્દુ ૩।૧૧

ભૂમાનન્દસ્વરૂપોઽસ્મિ ભાષાહીનોઽસ્મ્યહં સદા ॥ ૮૯॥

તેજોબિન્દુ ૩।૧૨

સર્વાધિષ્ઠાનરૂપોઽસ્મિ સર્વદા ચિદ્ઘનોઽસ્મ્યહમ્ ॥ ૯૦॥

તેજોબિન્દુ ૩।૧૨

ચિત્તવૃત્તિવિહીનોઽહં ચિદાત્મૈકરસોઽસ્મ્યહમ્ ॥ ૯૧॥ તેજોબિન્દુ ૩।૧૪

અહં બ્રહ્મૈવ સર્વં સ્યાદહં ચૈતન્યમેવ હિ ॥ ૯૨॥

તેજોબિન્દુ ૩।૧૬

અહમેવાહમેવાસ્મિ ભૂમાકારસ્વરૂપવાન્ ॥ ૯૩॥

તેજોબિન્દુ ૩।૧૬

અહમેવ મહાનાત્મા હ્યહમેવ પરાત્પરઃ ॥ ૯૪॥

તેજોબિન્દુ ૩।૧૭

અહમન્યવદાભામિ હ્યહમેવ શરીરવત્ ॥ ૯૫॥

તેજોબિન્દુ ૩।૧૭

અહં શિષ્યવદાભામિ હ્યહં લોકત્રયાશ્રયઃ ॥ ૯૬॥

તેજોબિન્દુ ૩।૧૮

અહં કાલત્રયાતીતો હ્યહં વેદૈરુપાસિતઃ ॥ ૯૭॥

તેજોબિન્દુ ૩।૧૮

અહં શાસ્ત્રેણ નિર્ણીત અહં ચિત્તે વ્યવસ્થિતઃ ॥ ૯૮॥

તેજોબિન્દુ ૩।૧૯

આનન્દઘન એવાહમહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૯૯॥

તેજોબિન્દુ ૩।૨૬

આત્મનાત્મનિ તૃપ્તોઽસ્મિ હ્યરૂપો હ્યહમવ્યયઃ ॥ ૧૦૦॥

તેજોબિન્દુ ૩।૨૮

આકાશાદપિ સૂક્ષ્મોઽહમાદ્યન્તાભાવવાનહમ્ ॥ ૧૦૧॥

તેજોબિન્દુ ૩।૨૯

સત્તામાત્રસ્વરૂપોઽહં શુદ્ધમોક્ષસ્વરૂપવાન્ ॥ ૧૦૨॥

તેજોબિન્દુ ૩।૩૦

સત્યાનન્દસ્વરૂપોઽહં જ્ઞાનાનન્દઘનોઽસ્મ્યહમ્ ॥ ૧૦૩॥

તેજોબિન્દુ ૩।૩૧

નામરૂપવિમુક્તોઽહમહમાનન્દવિગ્રહઃ ॥ ૧૦૪॥

તેજોબિન્દુ ૩।૩૬

આદિચૈતન્યમાત્રોઽહમખણ્ડૈકરસોઽસ્મ્યહમ્ ॥ ૧૦૫॥

તેજોબિન્દુ ૩।૩૭

સર્વત્ર પૂર્ણરૂપોઽહં પરામૃતરસોઽસ્મ્યહમ્ ॥ ૧૦૬॥

તેજોબિન્દુ ૩।૩૮

એકમેવાદ્વિતીયં સદ્બ્રહ્મૈવાહં ન સંશયઃ ॥ ૧૦૭॥

તેજોબિન્દુ ૩।૩૯

અહમેવ પરં બ્રહ્મ હ્યહમેવ ગુરોર્ગુરુઃ ॥ ૧૦૮॥

તેજોબિન્દુ ૬।૪૪

સર્વજ્ઞાનપ્રકાશોઽસ્મિ મુખ્યવિજ્ઞાનવિગ્રહઃ ॥ ૧૦૯॥

તેજોબિન્દુ ૬।૬૮

તુર્યાતુર્યપ્રકાશોઽસ્મિ તુર્યાતુર્યાદિવર્જિતઃ ॥ ૧૧૦॥

તેજોબિન્દુ ૬।૬૯

દૃશિસ્વરૂપં ગગનોપમં પરં સકૃદ્વિભાતં ત્વજમેકમક્ષરમ્ ॥ ૧૧૧॥

મુક્તિકા ૨।૭૩

અલેપકં સર્વગતં યદવ્યયં તદેવ ચાહં સકલં વિમુક્ત ૐ ॥ ૧૧૨॥

મુક્તિકા ૨।૭૩

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં જન્મપાપં વિનાશયેત્ ॥ ૧૧૩॥

તેજોબિન્દુ ૩।૬૧

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં ભેદબુદ્ધિં વિનાશયેત્ ॥ ૧૧૪॥

તેજોબિન્દુ ૩।૬૩

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં કોટિદોષં વિનાશયેત્ ॥ ૧૧૫॥

તેજોબિન્દુ ૩।૬૮

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં જ્ઞાનાનન્દં પ્રયચ્છતિ ॥ ૧૧૬॥

તેજોબિન્દુ ૩।૭૩

સર્વમન્ત્રાન્સમુત્સૃજ્ય ઇમં મન્ત્રં સમભ્યસેત્ ॥ ૧૧૭॥

તેજોબિન્દુ ૩।૭૪

સદ્યો મોક્ષમવાપ્નોતિ નાસ્તિ સન્દેહમણ્વપિ ॥ ૧૧૮॥

તેજોબિન્દુ ૩।૭૪

ઇતિ સ્વાનુભૂતિવાક્યાનિ અષ્ટાદશોત્તરશતમ્ ॥ ૧૧૮॥

નવમં પ્રકરણં સમાપ્તમ્ ।

---

૧૦ અથ સાર્ધાન્તિકસમાધિવાક્યાનિ । (૫૦)

જીવાત્મપરમાત્મૈક્યાવસ્થા ત્રિપુટિરહિતા પરમાનન્દસ્વરૂપા
શુદ્ધચૈતન્યાત્મિકા સમાધિઃ ॥ ૧॥

શાણ્ડિલ્ય ૧।૧૧*

ધ્યાતૃધ્યાને વિહાય નિવાતસ્થિતદીપવદ્ધ્યેયૈકગોચરં ચિત્તં સમાધિઃ ॥ ૨॥

પૈઙ્ગલ ૩*

મનઃ પ્રચારશૂન્યં પરમાત્મનિ લીનં ભવતિ ॥ ૩॥

મણ્ડલબ્રાહ્મણ ૩।૧

પ્રાપ્તે જ્ઞાનેન વિજ્ઞાને જ્ઞેયે પરમાત્મનિ હૃદિ સંસ્થિતે દેહે

લબ્ધશાન્તિપદં ગતે તદા પ્રભા મનોબુદ્ધિશૂન્યં ભવતિ ॥ ૪॥

પૈઙ્ગલ ૪।૯

પ્રાણાપાનયોરૈક્યં કૃત્વા ધૃતકુમ્ભકો નાસાગ્રદર્શનદૃઢભાવનયા

દ્વિકરાઙ્ગુલિભિઃ ષણ્મુખીકરણેન પ્રણવધ્વનિં નિશમ્ય મનસ્તત્ર

લીનં ભવતિ ॥ ૫॥

મણ્ડલબ્રાહ્મણ ૨।૨

પયઃસ્રવાનન્તરં ધેનુસ્તનક્ષીરમિવ સર્વેન્દ્રિયવર્ગે પરિનષ્ટે મનોનાશં ભવતિ ॥ ૬॥

મણ્ડલબ્રાહ્મણ ૩।૧

યદા પઞ્ચાવતિષ્ઠન્તે જ્ઞાનાનિ મનસા સહ ॥ ૭॥

મૈત્રાયણી ૬।૩૦*

બુદ્ધિશ્ચ ન વિચેષ્ટતિ તામાહુઃ પરમાં ગતિમ્ ॥ ૮॥

કઠ ૨।૩।૧૦

સંશાન્તસર્વસઙ્કલ્પા યા શિલાવદવસ્થિતિઃ ॥ ૯॥

મહા ૫।૬

જાગ્રન્નિદ્રાવિનિર્મુક્તા સા સ્વરૂપસ્થિતિઃ પરા ॥ ૧૦॥

મહા ૫।૬

મારુતેમધ્યસઞ્ચારે મનઃસ્થૈર્યં પ્રજાયતે ॥ ૧૧॥

શાણ્ડિલ્ય ૧।૫।૧૦

યો મનઃ સુસ્થિરીભાવઃ સૈવાવસ્થા મનોન્મની ॥ ૧૨॥

શાણ્ડિલ્ય ૧।૫।૧૦

સરૂપોઽસૌ મનોનાશો જીવન્મુક્તસ્ય વિદ્યતે ॥ ૧૩॥

અન્નપૂર્ણા ૪।૧૮

નિદાઘરૂપનાશસ્તુ વર્તતે દેહમુક્તિકે ॥ ૧૪॥

અન્નપૂર્ણા ૪।૧૮

ચિત્તે ચૈત્યદશાહીને યા સ્થિતિઃ ક્ષીણચેતસામ્ ॥ ૧૫॥

અન્નપૂર્ણા ૨।૧૨

સોચ્યતે શાન્તકલના જાગ્રત્યેવ સુષુપ્તતા ॥ ૧૬॥

અન્નપૂર્ણા ૨।૧૨

નૈતજ્જાગ્રન્ન ચ સ્વપ્નઃ સઙ્કલ્પાનામભાવનાત્ ॥ ૧૭॥ અન્નપૂર્ણા ૫।૧૦૯

સુષુપ્તભાવો નાપ્યેતદભાવાજ્જડતાસ્થિતેઃ ॥ ૧૮॥

અન્નપૂર્ણા ૫।૧૦૯

તત્ત્વાવબોધ એવાસૌ વાસનાતૃણપાવકઃ ॥ ૧૯॥

મહા ૪।૧૨

પ્રોક્તઃ સમાધિશબ્દેન ન તુ તૂષ્ણીમવસ્થિતિઃ ॥ ૨૦॥

મહા ૪।૧૨

નિર્વિકારતયા વૃત્ત્યા બ્રહ્માકારતયા પુનઃ ॥ ૨૧॥

તારસાર ૧।૩૭

વૃત્તિવિસ્મરણં સમ્યક્સમાધિરભિધીયતે ॥ ૨૨॥

તારસાર ૧।૩૭

દૃશ્યાસમ્ભવબોધેન રાગદ્વેષાદિતાનવે ॥ ૨૩॥

મહા ૪।૬૨

રતિર્વલોદિતા યા સા સમાધિરભિધીયતે ॥ ૨૪॥

મહા ૪।૬૨

અહમેવ પરં બ્રહ્મ બ્રહ્માહમિતિ સંસ્થિતિઃ ॥ ૨૫॥

ત્રિશિખિબ્રાહ્મણ ૧૬૦

સમાધિઃ સ તુ વિજ્ઞેયઃ સર્વવૃત્તિનિરોધકઃ ॥ ૨૬॥

ત્રિશિખિબ્રાહ્મણ ૧૬૧

સમાધિઃ સંવિદુત્પત્તિઃ પરજીવૈકતાં પ્રતિ ॥ ૨૭॥

અન્નપૂર્ણા ૫।૭૫

ધ્યાનસ્ય વિસ્મૃતિઃ સમ્યક્સમાધિરભિધીયતે ॥ ૨૮॥

ત્રિશિખિબ્રાહ્મણ ૩૨

સમાહિતા નિત્યતૃપ્તા યથાભૂતાર્થદર્શિની ॥ ૨૯॥

અન્નપૂર્ણા ૧।૪૮

બ્રહ્મન્સમાધિશબ્દેન પરા પ્રજ્ઞોચ્યતે બુધૈઃ ॥ ૩૦॥

અન્નપૂર્ણા ૧।૪૮

અક્ષુબ્ધા નિરહઙ્કારા દ્વન્દ્વેષ્વનનુપાતિની ॥ ૩૧॥

અન્નપૂર્ણા ૧।૪૯

બ્રહ્મન્સમાધિ શબ્દેન મેરોઃ સ્થિરતરા સ્થિતિઃ ॥ ૩૨॥

અન્નપૂર્ણા ૧।૪૯

નિશ્ચિતા વિગતાઽભીષ્ટા હેયોપાદેયવર્જિતા ॥ ૩૩॥

અન્નપૂર્ણા ૧।૫૦

બ્રહ્મન્સમાધિ શબ્દેન પરિપૂર્ણમનોગતિઃ ॥ ૩૪॥

અન્નપૂર્ણા ૧।૫૦

સલિલે સૈન્ધવં યદ્વત્સામ્યં ભજતિ યોગતઃ ॥ ૩૫॥

વરાહ ૨।૭૫*

તથાત્મમનસોરૈક્યં સમાધિરભિધીયતે ॥ ૩૬॥

સૌભાગ્યલક્ષ્મી ૨।૧૪

યત્સમત્વં તયોરત્ર જીવાત્મપરમાત્મનોઃ ॥ ૩૭॥

સૌભાગ્યલક્ષ્મી ૨।૧૬

સમસ્તનષ્ટસઙ્કલ્પઃ સમાધિરભિધીયતે ॥ ૩૮॥

સૌભાગ્યલક્ષ્મી ૨।૧૬

પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં નિરામયમ્ ॥ ૩૯॥

સૌભાગ્યલક્ષ્મી ૨।૧૭

સર્વશૂન્યં નિરાભાસં સમાધિરભિધીયતે ॥ ૪૦॥

સૌભાગ્યલક્ષ્મી ૨।૧૭

બ્રહ્માકારમનોવૃત્તિપ્રવાહોઽહઙ્કૃતિં વિના ॥ ૪૧॥

મુક્તિકા ૨।૫૩*

સંપ્રજ્ઞાતસમાધિઃ સ્યાદ્ધ્યાનાભ્યાસપ્રકર્ષતઃ ॥ ૪૨॥

મુક્તિકા ૨।૫૪

પ્રશાન્તવૃત્તિકં ચિત્તં પરમાનન્દદીપકમ્ ॥ ૪૩॥

મુક્તિકા ૨।૫૪*

અસંપ્રજ્ઞાતનામાયં સમાધિર્યોગિનાં પ્રિયઃ ॥ ૪૪॥

મુક્તિકા ૨,૫૪

સ્વાનુભૂતિરસાવેશાદ્દૃશ્યશબ્દાવુપેક્ષિતુઃ ॥ ૪૫॥

સરસ્વતીરહસ્ય ૨।૨૮*

નિર્વિકલ્પસમાધિઃ સ્યાન્નિવાતસ્થિતદીપવત્ ॥ ૪૬॥

સરસ્વતીરહસ્ય ૨।૨૯

પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં ચિદાત્મકમ્ ॥ ૪૭॥

મુક્તિકા ૨।૫૫

અતદ્વ્યાવૃત્તિરૂપોઽસૌ સમાધિર્મુનિભાવિતઃ ॥ ૪૮॥

મુક્તિકા ૨।૫૫

ઊર્ધ્વપૂર્ણમધઃપૂર્ણં મધ્યપૂર્ણં શિવાત્મકમ્ ॥ ૪૯॥

મુક્તિકા ૨।૫૬

સાક્ષાદ્વિધિમુખો હ્યેષ સમાધિઃ પારમાર્થિકઃ ॥ ૫૦॥

મુક્તિકા ૨।૫૬

ઇતિ સાર્ધાન્તિકસમાધિવાક્યાનિ પઞ્ચાશત્ ॥ ૫૦॥

દશમં પ્રકરણં સમાપ્તમ્ ।

---

૧૧ અથ સાર્ધાન્તિકાષ્ટવિધિસ્વરૂપવાક્યેષુ નાનાલિઙ્ગસ્વરૂપવાક્યાનિ ॥ (૩૨)

શ્રોત્રસ્ય શ્રોત્રં મનસો મનો યદ્વાચો હ વાચં સ ઉ પ્રાણસ્ય પ્રાણઃ ॥ ૧॥

કેન ૨*

યો વૈ ભૂમા તત્સુખમ્ ॥ ૨॥

છાન્દોગ્ય ૭।૨૩।૧*

યો વૈ ભૂમા તદમૃતમ્ ॥ ૩॥

છાન્દોગ્ય ૭।૨૪।૧

નેતિ નેતિ નહ્યેતસ્માદિતિ નેત્યન્યત્પરમસ્ત્યથ નામધેય ૅ

સત્યસ્ય સત્યમિતિ પ્રાણા વૈ સત્યં તેષામેવ સત્યમ્ ॥ ૪॥

બૃહદારણ્યક ૨।૩।૬*

રાતેર્દાતુઃ પરાયણમ્ ॥ ૫॥

મહા ૨।૯

સ પર્યગાચ્છુક્રમકાયમવ્રણમસ્નાવિરꣳ શુદ્ધમપાપવિદ્ધમ્ ॥ ૬॥

ઈશ ૮*

પ્રણવો હ્યપરં બ્રહ્મ પ્રણવશ્ચ પરઃ સ્મૃતઃ ॥ ૭॥

માણ્ડુક્યકારિકા ૧।૨૬*

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ॥ ૮॥

આત્મ ૩૧*

ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૯॥

અમૃતબિન્દુ ૩।૧૦

અખણ્ડૈકરસં શાસ્ત્રમખણ્ડૈકરસા ત્રયી ॥ ૧૦॥

તેજોબિન્દુ ૨।૩

અખણ્ડૈકરસો દેહ અખણ્ડૈકરસં મનઃ ॥ ૧૧॥

તેજોબિન્દુ ૨।૭

અખણ્ડૈકરસં સૂત્રમખણ્ડૈકરસો વિરાટ્ ॥ ૧૨॥

તેજોબિન્દુ ૨।૧૪

અખણ્ડૈકરસા વિદ્યા હ્યખણ્ડૈકરસોઽવ્યયઃ ॥ ૧૩॥

તેજોબિન્દુ ૨।૮

અખણ્ડૈકરસં ગોપ્યમખણ્ડૈકરસઃ શશી ॥ ૧૪॥

તેજોબિન્દુ ૨।૧૬

અખણ્ડૈકરસં ક્ષેત્રમખણ્ડૈકરસા ક્ષમા ॥ ૧૫॥

તેજોબિન્દુ ૨।૧૭

અખણ્ડૈકરસાસ્તારા અખણ્ડૈકરસો રવિઃ ॥ ૧૬॥

તેજોબિન્દુ ૨।૧૭

અખણ્ડૈકરસો જ્ઞાતા અખણ્ડૈકરસા સ્થિતિઃ ॥ ૧૭॥

તેજોબિન્દુ ૨।૧૨

અખણ્ડૈકરસા માતા અખણ્ડૈકરસઃ પિતા ॥ ૧૮॥

તેજોબિન્દુ ૨।૧૩

અખણ્ડૈકરસો રાજા અખણ્ડૈકરસં પુરમ્ ॥ ૧૯॥

તેજોબિન્દુ ૨।૧૯

અખણ્ડૈકરસં તારમખણ્ડૈકરસો જપઃ ॥ ૨૦॥

તેજોબિન્દુ ૨।૨૦

સર્વવર્જિતચિન્માત્રં ત્વત્તા મત્તા ચ ચિન્મયમ્ ॥ ૨૧॥

તેજોબિન્દુ ૨।૨૬

આદિરન્તં ચ ચિન્માત્રં ગુરુશિષ્યાદિ ચિન્મયમ્ ॥ ૨૨॥

તેજોબિન્દુ ૨।૩૧

દૃગ્દૃશ્યં યદિ ચિન્માત્રમસ્તિ ચેચ્ચિન્મયં સદા ॥ ૨૩॥

તેજોબિન્દુ ૨।૩૧

સર્વાશ્ચર્યં ચ ચિન્માત્રં દેહશ્ચિન્માત્રમેવ હિ ॥ ૨૪॥

તેજોબિન્દુ ૨।૩૨

અહં ત્વં ચૈવ ચિન્માત્રં મૂર્તામૂર્તાદિ ચિન્મયમ્ ॥ ૨૫॥

તેજોબિન્દુ ૨।૩૩

પુણ્યં પાપં ચ ચિન્માત્રં જીવશ્ચિન્માત્રવિગ્રહઃ ॥ ૨૬॥

તેજોબિન્દુ ૨।૩૩

દેહત્રયવિહીનત્વાત્કાલત્રયવિવર્જનાત્ ॥ ૨૭॥

તેજોબિન્દુ ૫।૧૭*

જીવત્રયગુણાભાવાત્તાપત્રયવિવર્જનાત્ ॥ ૨૮॥

તેજોબિન્દુ ૫।૧૮

લોકત્રયવિહીનત્વાત્સર્વમાત્મેતિ શાસનાત્ ॥ ૨૯॥

તેજોબિન્દુ ૫।૧૮

ચિત્તાભાવાચ્ચિન્તનીયં દેહાભાવાજ્જરા ન ચ ॥ ૩૦॥

તેજોબિન્દુ ૫।૧૯*

પાદાભાવાદ્ગતિર્નાસ્તિ હસ્તાભાવાત્ક્રિયા ન ચ ॥ ૩૧॥

તેજોબિન્દુ ૫।૧૯

મૃત્યુર્નાસ્તિ જનાભાવાદ્બુદ્ધ્યભાવાત્સુખાદિકમ્ ॥ ૩૨॥

તેજોબિન્દુ ૫।૨૦

ઇતિ સાર્ધાન્તિકનાનાલિઙ્ગસ્વરૂપવાક્યાનિ દ્વાત્રિંશત્ ॥ ૩૨॥

એકાદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૨ અથ સાર્ધાન્તિકપુંલિઙ્ગસ્વરૂપવાક્યાનિ । (૩૦)

સ એષોઽકલોઽમૃતઃ ॥ ૧॥

પ્રશ્ન ૬।૫*

નાન્તઃપ્રજ્ઞં ન બહિઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં ન પ્રજ્ઞાનઘનં
ન પ્રજ્ઞંનાપ્રજ્ઞમદૃશ્યમવ્યવહાર્યમગ્રાહ્યમલક્ષણમચિન્ત્યમ્-
અવ્યપદેશ્યમૈકાત્મપ્રત્યયસારં પ્રપઞ્ચોપશમં શાન્તં
શિવમદ્વૈતં ચતુર્થં મન્યન્તે સ આત્મા સ વિજ્ઞેયઃ ॥ ૨॥

રામોત્તરતાપિની ૩।૫*

અમાત્રશ્ચતુર્થોઽવ્યવહાર્યઃ પ્રપઞ્ચોપશમઃ શિવોઽદ્વૈતઃ ॥ ૩॥

માણ્ડુક્ય ૧૨*

યત્ર નાન્યત્પશ્યતિ નાન્યચ્છૃણોતિ નાન્યદ્વિજાનાતિ સ ભૂમા ॥ ૪॥

છાન્દોગ્ય ૭।૨૪।૧*

સ એષ નેતિનેત્યાત્માઽગૃહ્યો ન હિ ગૃહ્યતેઽશીર્યો ન હિ
શીર્યતેઽસઙ્ગોન હિ સજ્યતેઽસિતો ન વ્યથતે ન રિષ્યતિ ॥ ૫॥

બૃહદારણ્યક ૩।૯।૨૬*

રસઘન એવૈવં વાઽરેયમાત્માનન્તરોઽબાહ્યઃ કૃત્સ્નઃ
પ્રજ્ઞાનઘન એવ ॥ ૬॥

બૃહદારણ્યક ૪।૫।૧૩*

તસ્માન્મનો વિલીને મનસિ ગતે સઙ્કલ્પવિકલ્પે દગ્ધે પુણ્યપાપે સદાશિવઃ
ૐ શક્ત્યાત્મકઃ સર્વત્રાવસ્થિતિઃ સ્વયંજ્યોતિઃ શુદ્ધો નિત્યો નિરઞ્જનઃ
શાન્તતમઃ પ્રકાશયતિ ॥ ૭॥

હંસ ૨*

એષ શુદ્ધઃ પૂતઃ શૂન્યઃ શાન્તોઽપ્રાણોઽનીશાત્માનન્તોઽક્ષયઃ સ્થિરઃ
શાશ્વતોઽજઃ સ્વતન્ત્રઃ સ્વે મહિમ્નિ તિષ્ઠતિ ॥ ૮॥

મૈત્રાયણી ૨।૪; ૬।૨૮

ચક્ષુષો દ્રષ્ટા શ્રોત્રસ્ય દ્રષ્ટા મનસો દ્રષ્ટા વાચો દ્રષ્ટા
બુદ્ધેર્દ્રષ્ટા પ્રાણસ્ય દ્રષ્ટા તમસો દ્રષ્ટા સર્વસ્ય દ્રષ્ટા તતઃ
સર્વસ્માદન્યો વિલક્ષણઃ સદ્ઘનોઽયં ચિદ્ઘન આનન્દઘન
એવૈકરસોઽવ્યવહાર્યઃ ॥ ૯॥

નૃસિંહતાપિની ૨।૨।૧

સન્માત્રો નિત્યઃ શુદ્ધો બુદ્ધઃ સત્યો મુક્તો નિરઞ્જનો વિભુરદ્વયાનન્દઃ
પરઃ પ્રત્યગેકરસઃ ॥ ૧૦॥

નૃસિંહતાપિની ૨।૯।૧

અદૃષ્ટોઽવ્યવહાર્યોઽપ્યલ્પો નાલ્પઃ સાક્ષ્યવિશેષઃસર્વજ્ઞોઽનન્તોઽભિન્નોઽદ્વયો
વિદિતાવિદિતાત્પરઃ ॥ ૧૧॥

નૃસિંહતાપિની ૨।૯।૧

શુદ્ધો દેવ એકો નારાયણો ન દ્વિતીયોઽસ્તિ કશ્ચિત્ ॥ ૧૨॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

અચક્ષુર્વિશ્વતશ્ચક્ષુરકર્ણો વિશ્વતઃકર્ણ અપાદો વિશ્વતઃપાદ
અપાણિર્વિશ્વતઃપાણિરહમશિરા વિશ્વતઃશિરા વિદ્યામાત્રૈકસંશ્રયો વિદ્યારૂપઃ ॥ ૧૩॥

ભસ્મજાબાલ ૨

દિવ્યો હ્યમૂર્તઃ પુરુષઃ સબાહ્યાભ્યન્તરો હ્યજઃ ॥ ૧૪॥

મુણ્ડક ૨।૧।૨

અપ્રાણો હ્યમનાઃ શુભ્રો હ્યક્ષરાત્પરતઃ પરઃ ॥ ૧૫॥

મુણ્ડક ૨।૧।૨

અદ્વૈતઃ સર્વભાવાનાં દેવસ્તુર્યો વિભુઃ સ્મૃતઃ ॥ ૧૬॥

માણ્ડુક્યકારિકા ૧।૧૦

અપૂર્વોઽનન્તરોઽબાહ્યો ન પરઃ પ્રણવોઽવ્યયઃ ॥ ૧૭॥

માણ્ડુક્યકારિકા ૧।૨૬

અમાત્રોઽનન્તમાત્રશ્ચ દ્વૈતસ્યોપશમઃ શિવઃ ॥ ૧૮॥

માણ્ડુક્યકારિકા ૧।૨૯
કર્માધ્યક્ષઃ સર્વભૂતાધિવાસઃ સાક્ષી ચેતા કેવલો નિર્ગુણશ્ચ ॥ ૧૯॥

બ્રહ્મ
સર્વસઙ્કલ્પરહિતઃ સર્વનાદમયઃ શિવઃ ॥ ૨૦॥

તેજોબિન્દુ ૫।૨
સર્વવર્જિતચિન્માત્રઃ સર્વાનન્દમયઃ પરઃ ॥ ૨૧॥

તેજોબિન્દુ ૫।૨
સર્વાનુભવનિર્મુક્તઃ સર્વધ્યાનવિવર્જિતઃ ॥ ૨૨॥

તેજોબિન્દુ ૫।૩
આત્માઽનાત્મવિવેકાદિભેદાભેદવિવર્જિતઃ ॥ ૨૩॥

તેજોબિન્દુ ૫।૪
મહાવાક્યાર્થતો દૂરો બ્રહ્માસ્મીત્યતિદૂરતઃ ॥ ૨૪॥

તેજોબિન્દુ ૫।૫
તચ્છબ્દવર્જ્યસ્ત્વંશબ્દહીનો વાક્યાર્થવર્જિતઃ ॥ ૨૫॥

તેજોબિન્દુ ૫।૬
ક્ષરાક્ષરવિહીનો યો નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૨૬॥

તેજોબિન્દુ ૫।૬
અખણ્ડૈકરસો વાહમાનન્દોઽસ્મીતિવર્જિતઃ ॥ ૨૭॥

તેજોબિન્દુ ૫।૭
દૃશ્યદર્શનનિર્મુક્તઃ કેવલામલરૂપવાન્ ॥ ૨૮॥

મહા ૬।૭૯
નિત્યોદિતો નિરાભાસો દ્રષ્ટા સાક્ષી ચિદાત્મકઃ ॥ ૨૯॥

મહા ૬।૮૦
સ એવ વિદિતાદન્યસ્તથૈવાવિદિતાદપિ ॥ ૩૦॥

પાશુપતબ્રહ્મ ૧૩
ઇતિ સાર્ધાન્તિકપુંલિઙ્ગસ્વરૂપવાક્યાનિ ત્રિંશત્ ॥ ૩૦॥

દ્વાદશં પ્રકરણં સમાપ્તમ્

૧૩ અથ સાર્ધાન્તિકસ્ત્રીલિઙ્ગસ્વરૂપવાક્યાનિ । (૧૨)

અલૌકિકપરમાનન્દલક્ષણાખણ્ડામિતતેજોરાશિઃ ॥ ૧॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૮

ભાવાભાવકલાવિનિર્મુક્તા ચિદ્વિદ્યાઽદ્વિતીયબ્રહ્મસંવિત્તિઃ
સચ્ચિદાનન્દલહરી મહાત્રિપુરસુન્દરી બહિરન્તરપ્રવિશ્ય
સ્વયમેકૈવ વિભાતિ ॥ ૨॥

બહ્વૃચા

સર્વસઙ્કલ્પરહિતા સર્વસંજ્ઞાવિવર્જિતા ॥ ૩॥

મહા ૫।૧૦૦

સૈષા ચિદવિનાશાત્મા સ્વાત્મેત્યાદિકૃતા ભિધા ॥ ૪॥

મહા ૫।૧૦૦

આકાશશતભાગાચ્છા જ્ઞેષુ નિષ્કલરૂપિણી ॥ ૫॥

મહા ૫।૧૦૧

નાસ્તમેતિ ન ચોદેતિ નોત્તિષ્ઠતિ ન તિષ્ઠતિ ॥ ૬॥

મહા ૫।૧૦૨

ન ચ યાતિ ન ચાયાતિ ન ચ નેહ ચેહ ચિત્ ॥ ૭॥

મહા ૫।૧૦૨

સૈષા ચિદમલાકારા નિર્વિકલ્પા નિરાસ્પદા ॥ ૮॥

મહા ૫।૧૦૩

મહાચિદેકૈવેહાસ્તિ મહાસત્તેતિ ચોચ્યતે ॥ ૯॥

અન્નપૂર્ણા ૫।૫૫

નિષ્કલઙ્કા સમા શુદ્ધા નિરહઙ્કારરૂપિણી ॥ ૧૦॥

અન્નપૂર્ણા ૫।૫૫

સકૃદ્વિભાતા વિમલા નિત્યોદયવતી સમા ॥ ૧૧॥

અન્નપૂર્ણા ૫।૫૬

સા બ્રહ્મપરમાત્મેતિ નામભિઃ પરિગીયતે ॥ ૧૨॥

અન્નપૂર્ણા ૫।૫૬

ઇતિ સ્ત્રીલિઙ્ગસ્વરૂપવાક્યાનિ દ્વાદશ ॥ ૧૨॥

ત્રયોદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૪ અથ સાર્ધાન્તિકનપુંસકલિઙ્ગસ્વરૂપવાક્યાનિ ॥ (૩૯)
અન્યદેવ તદ્વિદિતાદથો અવિદિતાદધિ ॥ ૧॥

કેન ૪

યત્તદદ્રેશ્યમગ્રાહ્યમગોત્રમવર્ણમચક્ષુઃશ્રોત્રં તદપાણિપાદમ્ ॥ ૨॥ મુણ્ડક ૧।૧।૬
સદેવ સોમ્યેદમગ્ર આસીદેકમેવાદ્વિતીયમ્ ॥ ૩॥

પૈઙ્ગલ ૧

અસ્થૂલમનણ્વહ્રસ્વમદીર્ઘમલોહિતમસ્નેહમચ્છાયમતમોઽવાય્વનાકાશ-
મસઙ્ગમરસમગન્ધમચક્ષુષ્કમશ્રોત્રમવાગમનોઽતેજસ્કમપ્રાણ-
મમુખમમાત્રમનન્તરમબાહ્યમ્ ॥ ૪॥

બૃહદારણ્યક ૩।૭।૮

નિત્યં શુદ્ધં મુક્તં સત્યં સૂક્ષ્મં પરિપૂર્ણમદ્વયં
સદાનન્દચિન્માત્રં પુરતઃ સુવિભાતમદ્વૈતમચિન્ત્યમલિઙ્ગં
સ્વપ્રકાશમાનન્દઘનમ્ ॥ ૫॥

નૃસિંહતાપિની ૨।૯।૧

એતદ્ધ્યશબ્દમસ્પર્શમરૂપમરસમગન્ધમવક્તવ્યમદાતવ્યમગન્તવ્ય-
મવિસર્જયિતવ્યમનાનન્દયિતવ્યમમન્તવ્યમબોદ્ધવ્યમનહઙ્કર્તયિતવ્ય-
મચેતયિતવ્યમપ્રાણમિતવ્યમપાનયિતવ્યમવ્યાનયિતવ્યમનુદાનયિતવ્ય-
મસમાનયિતવ્યમનિન્દ્રિયમવિષયમકરણમલક્ષણમસઙ્ગમગુણ-
મવિક્રિયમવ્યપદેશ્યમસત્ત્વમરજસ્કમતમસ્કમમાયમભયમ-
પ્યૌપનિષદમેવ સુવિભાતં સકૃદ્વિભાતં પુરતોઽસ્માત્સુવિભાતમદ્વયમ્ ॥ ૬॥

નૃસિંહતાપિની ૨।૯।૧

અનિર્વચનીયં જ્યોતિઃ સર્વવ્યાપકં નિરતિશયાનન્દલક્ષણં પરમાકાશમ્ ॥ ૭॥

મણ્ડલબ્રાહ્મણ ૪।૧

તદ્બ્રહ્મ તાપત્રયાતીતં ષટ્કોશવિનિર્મુક્તં ષડૂર્મિવર્જિતં
પઞ્ચકોશાતીતં ષડ્ભાવવિકારશૂન્યમેવમાદિસર્વં વિલક્ષણમ્ ॥ ૮॥

મુદ્ગલ ૪

? નિરુપપ્લવં જ્યોતિરાભ્યન્તરં સર્વમાયાતીતમપ્રત્યગેકરસમદ્વિતીયમ્ ॥ ૯ ॥ ????

????

???? તજ્જ્યોતિરેકમદ્વિતીયં સર્વકલ્પનાતીતં ધ્રુવમક્ષરમેકં

સદા ચકાસ્તિ સચ્ચિદાનન્દમ્ ॥ ૧૦ ॥ ????

????

યત્તત્સત્યં વિજ્ઞાનમાનન્દં નિષ્ક્રિયં નિરઞ્જનં સર્વગતં સુસૂક્ષ્મં

સર્વતોમુખનિર્દેશ્યમમૃતં નિષ્કલમ્ રૂપમ્ ॥ ૧૧ ॥

શાણ્ડિલ્ય ૩।૧

એકમદ્વૈતં નિષ્કલં નિષ્ક્રિયં શાન્તં નિરતિશયમનામયમદ્વૈતં

ચતુર્થં બ્રહ્મવિષ્ણુરુદ્રાતીતમેકમાશાસ્યમ્ ॥ ૧૨ ॥

ભસ્મજાબાલ ૧

અદ્વયમનાદ્યન્તમશેષવેદવેદાન્તવેદ્યમનિર્દેશ્યમનિરુક્તમપ્રચ્યવ-

માશાસ્યમદ્વૈતં ચતુર્થં સર્વાધારમનાધારમનિરીક્ષ્યમ્ ॥ ૧૩ ॥

ભસ્મજાબાલ ૨

અશબ્દમસ્પર્શમરૂપમવ્યયં તથાઽરસન્નિત્યમગન્ધવચ્ચ યત્ ॥ ૧૪ ॥

કઠ ૧।૩।૧૫

પરં વિજ્ઞાનાદ્યદ્વરિષ્ઠં પ્રજાનાં યદર્ચિમદ્યદણુભ્યોઽણુ ચ ॥ ૧૫ ॥

મુણ્ડક ૨।૨।૧-૨

બૃહચ્ચ તદ્દિવ્યમચિન્ત્યરૂપં સૂક્ષ્માચ્ચ તત્સૂક્ષ્મતરં વિભાતિ ॥ ૧૬ ॥

મુણ્ડક ૩।૧।૪

એતજ્જ્ઞેયં નિત્યમેવાત્મસંસ્થં નાતઃ પરં વેદિતવ્યં હિ કિઞ્ચિત્ ॥ ૧૭ ॥

નારદપરિવ્રાજક ૯।૧૧

અઘોષમવ્યઞ્જનમસ્વરં ચ યત્તાલુકણ્ઠોષ્ઠમનાસિકં ચ યત્ ॥ ૧૮ ॥

અમૃતનાદ ૨૫

અરેફજાતમુભયોષ્મવર્જિતં યદક્ષરં ન ક્ષરતે કથઞ્ચિત્ ॥ ૧૯ ॥

અમૃતનાદ ૨૫

અગોચરં મનોવાચામવધૂતાદિસંપ્લવમ્ ॥ ૨૦ ॥

મૈત્રેયી ૧।૯

સત્તામાત્રપ્રકાશૈકપ્રકાશં ભાવનાતિગમ્ ॥ ૨૧॥

મૈત્રેયી ૧।૯

અહેયમનુપાદેયમસામાન્યવિશેષણમ્ ॥ ૨૨॥

મૈત્રેયી ૧।૧૦

ધ્રુવં સ્તિમિતગમ્ભીરં ન તેજો ન તમસ્તતમ્ ॥ ૨૩॥

મહા ૨।૬૫

નિષ્કલં નિર્મલં શાન્તં સર્વાતીતં નિરામયમ્ ॥ ૨૪॥

યોગશિખા ૧।૫

ન શૂન્યં નાપિ ચાકારિ ન દૃશ્યં નાપિ દર્શનમ્ ॥ ૨૫॥

મહા ૨।૬૬

ચિન્માત્રં ચૈત્યરહિતમનન્તમજરં શિવમ્ ॥ ૨૬॥

મહા ૨।૬૮

ચૈત્યાનુપાતરહિતં સામાન્યેન ચ સર્વગમ્ ॥ ૨૭॥

મહા ૪।૧૧૮

અનામયમનાભાસમનામકમકારણમ્ ॥ ૨૮॥

મહા ૫।૪૫

મનોવચોભ્યામગ્રાહ્યં પૂર્ણાત્પૂર્ણં સુખાત્સુખમ્ ॥ ૨૯॥

મહા ૫।૪૬

દ્રષ્ટૃદર્શનદૃશ્યાદિવર્જિતં તદિદં પદમ્ ॥ ૩૦॥

મહા ૫।૪૮

શુદ્ધં સૂક્ષ્મં નિરાકારં નિર્વિકારં નિરઞ્જનમ્ ॥ ૩૧॥

યોગશિખા ૨।૧૭

અપ્રમાણમનિર્દેશ્યમપ્રમેયમતીન્દ્રિયમ્ ॥ ૩૨॥

યોગશિખા ૩।૧૮

નિર્લેપકં નિરાપાયં કૂટસ્થમચલં ધ્રુવમ્ ॥ ૩૩॥

યોગશિખા ૩।૨૧

સદ્ઘનં ચિદ્ઘનં નિત્યમાનન્દઘનમવ્યયમ્ ॥ ૩૪॥

અધ્યાત્મ ૬૧

પ્રત્યગેકરસં પૂર્ણમનન્તં વિશ્વતોમુખમ્ ॥ ૩૫॥

અધ્યાત્મ ૬૧

અહેયમનુપાદેયમનાદેયમનાશ્રયમ્ ॥ ૩૬॥

અધ્યાત્મ ૬૨

શુદ્ધં બુદ્ધં સદા મુક્તમનામકમરૂપકમ્ ॥ ૩૭॥

તેજોબિન્દુ ૬।૭૦

સઙ્કલ્પસઙ્ક્ષયવશાદ્ગલિતે તુ ચિત્તે સંસારમોહમિહિકા ગલિતા ભવન્તિ ॥ ૩૮॥

મહા ૫।૫૩

સ્વચ્છં વિભાતિ શરદીવ ખમાગતાયાં ચિન્માત્રમેકમજમાદ્યમનન્તમન્તઃ ॥ ૩૯॥

મહા ૫।૫૩

ઇતિ સાર્ધાન્તિકનપુંસકલિઙ્ગસ્વરૂપવાક્યાન્યેકોનચત્વારિંશત્ ॥૩૯॥

ચતુર્દશં પ્રકરણં સમાપ્તમ્ ।

---

૧૫ અથ સાર્ધાન્તિકાત્મસ્વરૂપમહાવાક્યાનિ । (૪૦)

આકાશો હ વૈ નામ નામરૂપયોર્નિર્વહિતા તે યદન્તરા તદ્બ્રહ્મ તદમૃતં સ આત્મા ॥ ૧॥

છાન્દોગ્ય ૮।૧૪।૧

ઇદં સર્વં યદયમાત્મા ॥ ૨॥

નૃસિંહતાપિની ૨।૫।૧

ચિદેકરસો હ્યયમાત્મા ॥ ૩॥

નૃસિંહતાપિની ૨।૨।૧

અતો હ્યયમાત્મા ॥ ૪॥

નૃસિંહતાપિની ૨।૨।૧

અનુજ્ઞાતા હ્યયમાત્મા ॥ ૫॥

નૃસિંહતાપિની ૨।૮।૧

અનુજ્ઞૈકરસો હ્યયમાત્મા ॥ ૬॥

નૃસિંહતાપિની ૨।૮।૧

અવિકલ્પો હ્યયમાત્મા ॥ ૭॥

નૃસિંહતાપિની ૨।૮।૧

દેહાદેઃ પરતરત્વાદ્બ્રહ્મૈવ પરમાત્મા ॥ ૮॥

નિરલમ્બ

અખણ્ડૈકરસો હ્યયમાત્મા ॥ ૯॥

તેજોબિન્દુ ૨।૬

નિર્ગુણઃ સાક્ષીભૂતો નિષ્ક્રિયો નિરવયવાત્મા ॥ ૧૦॥

આત્મ ૧

વિરજઃ પર આકાશાદજ આત્મા મહાન્ ધ્રુવઃ ॥ ૧૧॥

બૃહદારણ્યક ૪।૪।૨૦

એકો દેવઃ સર્વભૂતેષુ ગૂઢઃ સર્વવ્યાપી સર્વભૂતાન્તરાત્મા ॥ ૧૨॥

શ્વેતાશ્વતર ૬।૧૧

નિઃશબ્દં પરમં બ્રહ્મ પરમાત્મા સમીર્યતે ॥ ૧૩॥

નાદબિન્દુ ૪૮

સકલે નિષ્કલે ભાવે સર્વત્રાત્માવ્યવસ્થિતઃ ॥ ૧૪॥

ધ્યાનબિન્દુ ૮

સર્વદા સર્વકૃત્સર્વઃ પરમાત્મેત્યુદાહૃતઃ ॥ ૧૫॥

મહા ૪।૫૬

અનાદ્યન્તાવભાસાત્મા પરમાત્મેહ વિદ્યતે ॥ ૧૬॥

અન્નપૂર્ણા ૨।૩૪

નિત્યઃ સર્વગતો હ્યાત્મા કૂટસ્થો દોષવર્જિતઃ ॥ ૧૭॥

અન્નપૂર્ણા ૫।૭૫

તત્પરઃ પરમાત્મા ચ શ્રીરામઃ પુરુષોત્તમઃ ॥ ૧૮॥

તારસાર ૨।૪

સર્વકારણકાર્યાત્મા કાર્યકારણવર્જિતઃ ॥ ૧૯॥

તેજોબિન્દુ ૫।૧

સર્વાતીતસ્વભાવાત્મા નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૨૦॥

તેજોબિન્દુ ૫।૭

નિર્વિકલ્પસ્વરૂપાત્મા સવિકલ્પવિવર્જિતઃ ॥ ૨૧॥

તેજોબિન્દુ ૪।૭૫

સદા સમાધિશૂન્યાત્મા આદિમધ્યાન્તવર્જિતઃ ॥ ૨૨॥

તેજોબિન્દુ ૪।૭૬

પ્રજ્ઞાનવાક્યહીનાત્મા અહં બ્રહ્માસ્મિવર્જિતઃ ॥ ૨૩॥

તેજોબિન્દુ ૪।૭૭

તત્ત્વમસ્યાદિહીનાત્મા અયમાત્મેત્યભાવકઃ ॥ ૨૪॥

તેજોબિન્દુ ૪।૭૭

ઓઙ્કારવાચ્યહીનાત્મા સર્વવાચ્યવિવર્જિતઃ ॥ ૨૫॥

તેજોબિન્દુ ૪।૭૮

સર્વત્ર પૂર્ણરૂપાત્મા સર્વત્રાત્માવશેષકઃ ॥ ૨૬॥

તેજોબિન્દુ ૪।૫

શુદ્ધચૈતન્યરૂપાત્મા સર્વસઙ્ગવિવર્જિતઃ ॥ ૨૭॥

તેજોબિન્દુ ૪।૬

આનન્દાત્મા પ્રિયો હ્યાત્મા મોક્ષાત્મા બન્ધવર્જિતઃ ॥ ૨૮॥

તેજોબિન્દુ ૪।૩૬

શૂન્યાત્મા સૂક્ષ્મરૂપાત્મા વિશ્વાત્મા વિશ્વહીનકઃ ॥ ૨૯॥

તેજોબિન્દુ ૪।૪૩

સત્તામાત્રસ્વરૂપાત્મા નાન્યત્કિઞ્ચિજ્જગદ્ભયમ્ ॥ ૩૦॥

તેજોબિન્દુ ૪।૪૫

અપરિચ્છિન્નરૂપાત્મા અણુસ્થૂલાદિવર્જિતઃ ॥ ૩૧॥

તેજોબિન્દુ ૪।૪૮

નામરૂપવિહીનાત્મા પરસંવિત્સુખાત્મકઃ ॥ ૩૨॥

તેજોબિન્દુ ૪।૪૯

સાક્ષ્યસાક્ષિત્વહીનાત્મા કિઞ્ચિત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૩૩॥

તેજોબિન્દુ ૪।૫૧

મુક્તામુક્તસ્વરૂપાત્મા મુક્તામુક્તવિવર્જિતઃ ॥ ૩૪॥

તેજોબિન્દુ ૪।૬૫

દ્વૈતાદ્વૈતસ્વરૂપાત્મા દ્વૈતાદ્વૈતાદિવર્જિતઃ ॥ ૩૫॥

તેજોબિન્દુ ૪।૬૬

નિષ્કલાત્મા નિર્મલાત્મા બુદ્ધ્યાત્મા પુરુષાત્મકઃ ॥ ૩૬॥

તેજોબિન્દુ ૪।૬૮

આત્મેતિશબ્દહીનો ય આત્મશબ્દાર્થવર્જિતઃ ॥ ૩૭॥

તેજોબિન્દુ ૫।૮

સચ્ચિદાનન્દહીનો ય એષૈવાત્મા સનાતનઃ ॥ ૩૮॥

તેજોબિન્દુ ૫।૮

યસ્ય કિઞ્ચિદ્બહિર્નાસ્તિ કિઞ્ચિદન્તઃ કિયન્ન ચ ॥ ૩૯॥

તેજોબિન્દુ ૫।૯

યસ્ય લિઙ્ગં પ્રપઞ્ચં વા બ્રહ્મૈવાત્મા ન સંશયઃ ॥ ૪૦॥

તેજોબિન્દુ ૫।૧૦

ઇતિ સાર્ધાન્તિકાત્મસ્વરૂપવાક્યાનિ ચત્વારિંશત્ ॥ ૪૦॥

પઞ્ચદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૬ અથ સાર્ધાન્તિકસર્વસ્વરૂપવાક્યાનિ ॥ (૪૦)

ૐકાર એવેદં સર્વમ્ ॥ ૧॥

છાન્દોગ્ય ૨।૨૩।૩

સ એવાધસ્તાત્સ ઉપરિષ્ટાત્સ પશ્ચાત્સ પુરસ્તાત્સ
દક્ષિણતઃ સ ઉત્તરતઃ સ એવેદં સર્વમ્ ॥ ૨॥

છાન્દોગ્ય ૭।૨૫।૧

અહમેવાધસ્તાદહમુપરિષ્ટાદહં પશ્ચાદહં
પુરસ્તાદહં દક્ષિણતોઽહમુત્તરતોઽહમેવેદં સર્વમ્ ॥ ૩॥

છાન્દોગ્ય ૭।૨૫।૧

આત્મૈવાધસ્તાદાત્મોપરિષ્ટાદાત્મા પશ્ચાદાત્મા પુરસ્તાદાત્મા
દક્ષિણત આત્મોત્તરત આત્મૈવેદં સર્વમ્ ॥ ૪॥

છાન્દોગ્ય ૭।૨૫।૨

આત્મૈવેદમમૃતમિદં બ્રહ્મેદં સર્વમ્ ॥ ૫॥

છાન્દોગ્ય ૭।૨૫।૨

એતદ્બ્રહ્મૈતત્સર્વમ્ ॥ ૬॥

બૃહદારણ્યક ૫।૧।૧

????? નારાયણ એવેદં સર્વમ્ ॥ ૭॥ ????

???? નારાયણોત્તર્તાપિની ૧।૫

સચ્ચિદાનન્દરૂપમિદં સર્વમ્ ॥ ૮॥

નૃસિંહતાપિની ૨।૭।૧

સત્તામાત્રં હીદં સર્વમ્ ॥ ૯॥

નૃસિંહતાપિની ૯

મત્સ્વરૂપમેવેદં સર્વમ્ ॥ ૧૦॥

ત્રિપાદ્વિભૂતિનારાયણ ૮

સ એવ સર્વં યદ્ભૂતં યચ્ચ ભવ્યં સનાતનમ્ ॥ ૧૧॥

કૈવલ્ય ૧।૯

સ્વયં બ્રહ્મા સ્વયં વિષ્ણુઃ સ્વયમિન્દ્રઃ સ્વયં શિવઃ ॥ ૧૨॥

અધ્યાત્મ ૨૦

સ્વયં વિશ્વમિદં સર્વં સ્વસ્માદન્યન્ન કિઞ્ચન ॥ ૧૩॥

અધ્યાત્મ ૨૦

મરુભૂમૌ જલં સર્વં મરુભૂમાત્રમેવ તત્ ॥ ૧૪॥

મહા ૪।૮૪

જગત્ત્રયમિદં સર્વં ચિન્માત્રં સ્વવિચારતઃ ॥ ૧૫॥

મહા ૪।૮૪

ભવવર્જિતચિન્માત્રં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬॥

તેજોબિન્દુ ૨।૨૫

યત્કિઞ્ચિદ્યન્ન કિઞ્ચિચ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૧૭॥

તેજોબિન્દુ ૨।૨૭

અખણ્ડૈકરસં સર્વં યદ્યચ્ચિન્માત્રમેવ હિ ॥ ૧૮॥

તેજોબિન્દુ ૨।૨૮

ભૂતં ભવ્યં ભવિષ્યચ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૧૯॥

તેજોબિન્દુ ૨।૨૮

જ્ઞાતા ચિન્માત્રરૂપશ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૨૦॥

તેજોબિન્દુ ૨।૨૯

યચ્ચ યાવચ્ચ દૂરસ્થં સર્વં ચિન્માત્રમેવ હિ ॥ ૨૧॥

તેજોબિન્દુ ૨।૩૯

ચિન્માત્રાન્નાસ્તિ લક્ષ્યં ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૨૨॥

તેજોબિન્દુ ૨।૪૧

આત્મનોઽન્યા ગતિર્નાસ્તિ સર્વમાત્મમયં જગત્ ॥ ૨૩॥

તેજોબિન્દુ ૬।૪૬

આત્મનોઽન્યત્તુષં નાસ્તિ સર્વમાત્મમયં જગત્ ॥ ૨૪॥

તેજોબિન્દુ ૬।૪૬

સર્વમાત્મૈવ શુદ્ધાત્મા સર્વં ચિન્માત્રમદ્વયમ્ ॥ ૨૫॥

તેજોબિન્દુ ૬।૩૯

સર્વં ચ ખલ્વિદં બ્રહ્મ નિત્યચિદ્ઘનમક્ષતમ્ ॥ ૨૬॥

મહા ૪।૧૧૯

સમસ્તં ખલ્વિદં બ્રહ્મ સર્વમાત્મેદમાતતમ્ ॥ ૨૭॥

મહા ૬।૧૨

ન ત્વં નાહં ન ચાન્યં વા સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૮॥

તેજોબિન્દુ ૬।૪

ન તદસ્તિ ન યત્રાહં ન તદસ્તિ ન તન્મયમ્ ॥ ૨૯॥

મહા ૬।૧૧

કિમન્યદભિવાઞ્છામિ સર્વં સચ્ચિન્મયં તતમ્ ॥ ૩૦॥

મહા ૬।૧૧

ભ્રાન્તિરભ્રાન્તિર્નાસ્ત્યેવ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૧॥

તેજોબિન્દુ ૫।૪૨

ન દેહો ન ચ કર્માણિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૨॥

તેજોબિન્દુ ૬।૧૦૫

લક્ષણાત્રયવિજ્ઞાનં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૩॥

તેજોબિન્દુ ૬।૧૦૬

જગન્નામ્નાચિદાભાતિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૩૪॥

યોગશિખા ૪।૧૮

બ્રહ્મમાત્રમિદં સર્વં બ્રહ્મ માત્રમસન્ન હિ ॥ ૩૫॥

તેજોબિન્દુ ૬।૪૭

બ્રહ્મમાત્રં વૃત્તં સર્વં બ્રહ્મમાત્રં રસં સુખમ્ ॥ ૩૬॥

તેજોબિન્દુ ૬।૪૮

બ્રહ્મમાત્રં શ્રુતં સર્વં સ્વયં બ્રહ્મૈવ કેવલમ્ ॥ ૩૭॥

તેજોબિન્દુ ૬।૪૮

બ્રહ્મૈવ સર્વં ચિન્માત્રં બ્રહ્મમાત્રં જગત્ત્રયમ્ ॥ ૩૮॥

તેજોબિન્દુ ૬।૪૨

સર્વં પ્રશાન્તમજમેકમનાદિમધ્યમાભાસ્વરં સ્વદનમાત્રમચૈત્ય-
મચિહ્નમ્ ॥ ૩૯॥

મહા ૪।૧૦

સર્વં પ્રશાન્તમિતિ શબ્દમયી ચ દૃષ્ટિર્બોધાર્ધમેવ હિ મુધૈવ
તદોમિતીદમ્ ॥ ૪૦॥

મહા ૪।૧૦

ઇતિ સાર્ધાન્તિકસર્વસ્વરૂપવાક્યાનિ ચત્વારિંશત્ ॥ ૪૦॥

ષોડશં પ્રકરણં સમાપ્તમ્ ।

---

૧૭ અથ સાર્ધાન્તિકબ્રહ્મસ્વરૂપવાક્યાનિ । (૯૪)

સર્વં હ્યેતદ્ બ્રહ્મ ॥ ૧॥

રામોત્તરતાપિની ૩।૫

અયમાત્મા બ્રહ્મ ॥ ૨॥

શુકરહસ્ય ૨।૧।૪

સત્યં જ્ઞાનમનન્તં બ્રહ્મ ॥ ૩॥

તૈત્તિરીય ૨।૧

પ્રજ્ઞા પ્રતિષ્ઠા પ્રજ્ઞાનં બ્રહ્મ ॥ ૪॥

આત્મબોધ ૧

તદેતદ્બ્રહ્માઽપૂર્વમનપરમનન્તરમબાહ્યમયમાત્મા બ્રહ્મ સર્વાનુભૂઃ ॥ ૫॥

બૃહદારણ્યક ૨।૫।૧૯

વિજ્ઞાનમાનન્દં બ્રહ્મ ॥ ૬॥

બૃહદારણ્યક ૩।૯।૨૮

અજરોઽમરોઽમૃતોઽભયો બ્રહ્માભયં વૈ બ્રહ્મ ॥ ૭॥

ગોપાલતાપિની ૨।૯

સર્વભૂતસ્થમેકં નારાયણં કારણંપુરુષમકારણં પરં બ્રહ્મોમ્ ॥ ૮॥

આત્મબોધ ૧

સ્વયં પ્રકાશઃ સ્વયં બ્રહ્મ ॥ ૯॥

અથર્વશિખા ૩

તદેતદદ્વયં સ્વયંપ્રકાશમહાનન્દમાત્મૈવૈતદભય-
મમૃતમેતદ્બ્રહ્મ ॥ ૧૦॥

નૃસિંહતાપિની ૨।૮।૧

સદેવ પુરસ્તાત્સિદ્ધં બ્રહ્મ ॥ ૧૧॥

નૃસિંહતાપિની ૨।૯।૧

આકાશવત્સૂક્ષ્મં કેવલસત્તામાત્રસ્વભાવં પરં બ્રહ્મ ॥ ૧૨॥

સર્વસાર ૧

અદ્વિતીયમખિલોપાધિવિનિર્મુક્તં તત્સકલશક્ત્યુપબૃંહિતમનાદ્યનન્તં
નિત્યં શિવં શાન્તં નિર્ગુણમિત્યાદિવાચ્યમનિર્વાચ્યં ચૈતન્યં બ્રહ્મ ॥ ૧૩॥

નિરલમ્બ

એકમેવાદ્વિતીયં બ્રહ્મ ॥ ૧૪॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૩

સર્વદાનવચ્છિન્નં પરં બ્રહ્મ ॥ ૧૫॥

યોગચૂડામણિ ૭૨

સચ્ચિદાનન્દતેજઃરૂપં તારકં બ્રહ્મ ॥ ૧૬॥

મણ્ડલબ્રાહ્મણ ૧।૨

તન્નિત્યમુક્તમવિક્રિયં સત્યજ્ઞાનાનન્તાનન્દપરિપૂર્ણં
સનાતનમેકમેવાદ્વિતીયં બ્રહ્મ ॥ ૧૭॥

પૈઙ્ગલ ૧

ચિત્સ્વરૂપં નિરઞ્જનં પરં બ્રહ્મ ॥ ૧૮॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૭

તત્ત્વંપદલક્ષ્યં પ્રત્યગભિન્નં બ્રહ્મ ॥ ૧૯॥

પૈઙ્ગલ ૩

અખણ્ડાર્થં પરં બ્રહ્મ ॥ ૨૦॥

બહ્વૃચા

સર્વકાલાબાધિતં બ્રહ્મ ॥ ૨૧॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

સગુણનિર્ગુણસ્વરૂપં બ્રહ્મ ॥ ૨૨॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

આદિમધ્યાન્તશૂન્યં બ્રહ્મ ॥ ૨૩॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

માયાતીતગુણાતીતં બ્રહ્મ ॥ ૨૪॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

અનન્તમપ્રમેયાખણ્ડપરિપૂર્ણં બ્રહ્મ ॥ ૨૫॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

અદ્વિતીયપરમાનન્દનિત્યશુદ્ધબુદ્ધમુક્તસત્યસ્વરૂપવ્યાપકાભિન્નાપરિ-હ્છિન્નં બ્રહ્મ ॥ ૨૬॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

સચ્ચિદાનન્દસ્વપ્રકાશં બ્રહ્મ ॥ ૨૭॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

મનોવાચામગોચરં બ્રહ્મ ॥ ૨૮॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

દેશતઃ કાલતો વસ્તુતઃ પરિચ્છેદરહિતં બ્રહ્મ ॥ ૨૯॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

અખિલપ્રમાણાગોચરં બ્રહ્મ ॥ ૩૦॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

તુરીયં નિરાકારમેકં બ્રહ્મ ॥ ૩૧॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

અદ્વૈતમનિર્વાચ્યં બ્રહ્મ ॥ ૩૨॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૧

શિવં પ્રશાન્તમમૃતં બ્રહ્મયોનિમ્ ॥ ૩૩॥

કૈવલ્ય ૧।૬

યદેકમક્ષરં નિષ્ક્રિયં શિવં સન્માત્રં પરં બ્રહ્મ ॥ ૩૪॥

શાણ્ડિલ્ય ૩।૧

અસાવાદિત્યો બ્રહ્મ ॥ ૩૫॥

સૂર્ય

ૐમિત્યેતદક્ષરં પરં બ્રહ્મ ॥ ૩૬॥

તારસાર ૨।૧

બ્રહ્મૈવેદમમૃતં પુરસ્તાદ્બ્રહ્મ પશ્ચાદ્બ્રહ્મ દક્ષિણતશ્ચોત્તરેણ ॥ ૩૭॥

મુણ્ડક ૨।૨।૧૧

અધશ્ચોર્ધ્વં પ્રસૃતં બ્રહ્મૈવેદં વિશ્વમિદં વરિષ્ઠમ્ ॥ ૩૮॥

મુણ્ડક ૨।૨।૧૧

તદેવ નિષ્કલં બ્રહ્મ નિર્વિકલ્પં નિરઞ્જનમ્ ॥ ૩૯॥

અમૃતબિન્દુ ૮

ચૈતન્યમેકં બ્રહ્માતઃ પ્રજ્ઞાનં બ્રહ્મ મય્યપિ ॥ ૪૦॥

શુકરહસ્ય ૨।૨

બ્રહ્મશબ્દેન તદ્બ્રહ્મ સ્વપ્રકાશાત્મરૂપકમ્ ॥ ૪૧॥

શુકરહસ્ય ૨।૮

એતદ્ભાવવિનિર્મુક્તં તદ્ગ્રાહ્યં બ્રહ્મ તત્પરમ્ ॥ ૪૨॥

તારસાર ૧।૧૪

ચિન્માત્રાત્પરમં બ્રહ્મ ચિન્માત્રાન્નાસ્તિ કોઽપિ હિ ॥ ૪૩॥

તેજોબિન્દુ ૨।૩૫

અખણ્ડૈકરસં બ્રહ્મ ચિન્માત્રાન્ન હિ વિદ્યતે ॥ ૪૪॥

તેજોબિન્દુ ૨।૪૧

સદોદિતં પરં બ્રહ્મ જ્યોતિષામુદયો યતઃ ॥ ૪૫॥

નાદબિન્દુ ૧૭

યસ્મિન્પ્રલીયતે શબ્દસ્તત્પરં બ્રહ્મ ગીયતે ॥ ૪૬॥

બ્રહ્મવિદ્યા ૧૩

???? સર્વશક્તિ પરં બ્રહ્મ નિત્યમાપૂર્ણમદ્વયમ્ ॥ ૪૭॥ ????

????

સત્તા સર્વપદાર્થાનાં નાન્યા સંવેદનદૃતે ॥ ૪૮॥

મહા ૫।૪૭

પરં બ્રહ્મ પરં સત્ત્વં સચ્ચિદાનન્દલક્ષણમ્ ॥ ૪૯॥

યોગશિખા ૨।૧૬

અક્ષરં પરમં બ્રહ્મ નિર્વિશેષં નિરઞ્જનમ્ ॥ ૫૦॥

યોગશિખા ૩।૧૬

બ્રહ્મૈવૈકમનાદ્યન્તમબ્ધિવત્પ્રવિજૃમ્ભતે ॥ ૫૧॥

અન્નપૂર્ણા ૫।૧૦

ન કિઞ્ચિદ્ભાવનાકારં યત્તદ્બ્રહ્મ પરં વિદુઃ ॥ ૫૨॥

અન્નપૂર્ણા ૫।૪૮

એકમેવાદ્વયં બ્રહ્મ નેહ નનાસ્તિ કિઞ્ચન ॥ ૫૩॥

ત્રિપાદ્વિભૂતિનારાયણ ૩

બ્રહ્મૈવ વિદ્યતે સાક્ષાદ્વસ્તુતોઽવસ્તુતોઽપિ ચ ॥ ૫૪॥

પાશુપતબ્રહ્મ ૨૭

તદ્વિદ્યાવિષયં બ્રહ્મ સત્યજ્ઞાનસુખાદ્વયમ્ ॥ ૫૫॥

અન્નપૂર્ણા ૪।૨૭

શાન્તં ચ તદતીતં ચ પરં બ્રહ્મ તદુચ્યતે ॥ ૫૬॥

યોગશિખા ૬।૬૬

અનુભૂતિમયં તસ્માત્સારં બ્રહ્મેતિ કથ્યતે ॥ ૫૭॥

અન્નપૂર્ણા ૨।૧૭

યદિદં બ્રહ્મ પુચ્છાખ્યં સત્યજ્ઞાનાદ્વયાત્મકમ્ ॥ ૫૮॥

કઠરુદ્ર ૨૨

સદ્રૂપં પરમં બ્રહ્મ ત્રિપરિચ્છેદવર્જિતમ્ ॥ ૫૯॥

કઠરુદ્ર ૨૭

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ॥ ૬૦॥

કઠરુદ્ર ૩૪

સર્વાધિષ્ઠાનમદ્વન્દ્વં પરં બ્રહ્મ સનાતનમ્ ॥ ૬૧॥

અન્નપૂર્ણા ૪।૨૯

પ્રજ્ઞાનમેવ તદ્બ્રહ્મ સત્યપ્રજ્ઞાનલક્ષણમ્ ॥ ૬૨॥

મહા ૪।૮૧

અસ્તીત્યુક્તે જગત્સર્વં સદ્રૂપં બ્રહ્મ તદ્ભવેત્ ॥ ૬૩॥

વરાહ ૨।૭૧

ભાતીત્યુક્તે જગત્સર્વં ભાનં બ્રહ્મૈવ કેવલમ્ ॥ ૬૪॥

વરાહ ૨।૭૨

બ્રહ્મમાત્રં ચિદાકાશં સચ્ચિદાનન્દમદ્વયમ્ ॥ ૬૫॥

તેજોબિન્દુ ૬।૪૯

બ્રહ્મણોઽન્યતરન્નાસ્તિ બ્રહ્મણોઽન્યજ્જગન્ન ચ ॥ ૬૬॥

તેજોબિન્દુ ૬।૪૯

બ્રહ્મણોઽન્યદહ નાસ્તિ બ્રહ્મણોઽન્યત્ફલં ન હિ ॥ ૬૭॥

તેજોબિન્દુ ૬।૫૦

બ્રહ્મણોઽન્યત્તૃણં નાસ્તિ બ્રહ્મણોઽન્યત્પદં ન હિ ॥ ૬૮॥

તેજોબિન્દુ ૬।૫૦

બ્રહ્મણોઽન્યદ્ગુરુર્નાસ્તિ બ્રહ્મણોઽન્યદસદ્વપુઃ ॥ ૬૯॥

તેજોબિન્દુ ૬।૫૧

નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ॥ ૭૦॥

તેજોબિન્દુ ૬।૧૦૧

બીજં માયાવિનિર્મુક્તં પરં બ્રહ્મેતિ કીર્ત્યતે ॥ ૭૧॥

રામરહસ્ય ૫।૧૧

મદ્રૂપમદ્વયં બ્રહ્મ આદિમધ્યાન્તવર્જિતમ્ ॥ ૭૨॥

વાસુદેવ

સર્વત્રાવસ્થિતં શાન્તં ચિદ્બ્રહ્મેત્યનુભૂયતે ॥ ૭૩॥

અન્નપૂર્ણા ૫।૨૧

સિદ્ધાન્તોઽધ્યાત્મશાસ્ત્રાણાં સર્વાપહ્નવ એવ હિ ॥ ૭૪॥

અન્નપૂર્ણા ૫।૧૧૨

નાવિદ્યાસ્તીહ નો માયા શાન્તં બ્રહ્મેદમક્લમમ્ ॥ ૭૫॥

અન્નપૂર્ણા ૫।૧૧૨

સ્વાત્મન્યારોપિતાશેષાભાસવસ્તુનિરાસતઃ ॥ ૭૬॥

અધ્યાત્મ ૨૧

સ્વયમેવ પરં બ્રહ્મ પૂર્ણમદ્વયમક્રિયમ્ ॥ ૭૭॥

અધ્યાત્મ ૨૧

રામ એવ પરં બ્રહ્મ રામ એવ પરં તપઃ ॥ ૭૮॥

રમરહસ્ય ૬

રામ એવ પરં તત્ત્વં શ્રીરામો બ્રહ્મતારકમ્ ॥ ૭૯॥

રામરહસ્ય ૧।૬

ચિદ્રૂપમાત્રં બ્રહ્મૈવ સચ્ચિદાનન્દમદ્વયમ્ ॥ ૮૦॥

તેજોબિન્દુ ૩।૨૬

ઋતં સત્યં પરં બ્રહ્મ સર્વસંસારભેષજમ્ ॥ ૮૧॥

જાબાલદર્શન ૯।૧

બ્રહ્મ ચિદ્બ્રહ્મ ભુવનં બ્રહ્મ ભૂતપરમ્પરા ॥ ૮૨॥

અન્નપૂર્ણા ૫।૨૦

બ્રહ્માહં બ્રહ્મચિચ્છત્રુર્બ્રહ્મ ચિન્મિત્રબાન્ધવાઃ ॥ ૮૩॥

અન્નપૂર્ણા ૫।૨૦

બ્રહ્મરૂપતયા બ્રહ્મ કેવલં પ્રતિભાસતે ॥ ૮૪॥

આત્મ ૧

જગદ્રૂપતયાપ્યેતદ્બ્રહ્મૈવ પ્રતિભાસતે ॥ ૮૫॥

આત્મ ૨

વિદ્યાવિદ્યાદિભેદેન ભાવાભાવાદિભેદતઃ ॥ ૮૬॥

આત્મ ૨

ગુરુશિષ્યાદિભેદેન બ્રહ્મૈવ પ્રતિભાસતે ॥ ૮૭॥

આત્મ ૩

ઇદં બ્રહ્મ પરં બ્રહ્મ સત્યં બ્રહ્મ પ્રભુર્હિ સઃ ॥ ૮૮॥

તેજોબિન્દુ ૬।૩૫

કાલો બ્રહ્મ કલા બ્રહ્મ સુખં બ્રહ્મ સ્વયંપ્રભમ્ ॥ ૮૯॥

તેજોબિન્દુ ૬।૩૫

એકં બ્રહ્મ દ્વયં બ્રહ્મ મોહો બ્રહ્મ શમાદિકમ્ ॥ ૯૦॥

તેજોબિન્દુ ૬।૩૬

દોષો બ્રહ્મ ગુણો બ્રહ્મ દમઃ શાન્તં વિભુઃ પ્રભુઃ ॥ ૯૧॥

તેજોબિન્દુ ૬।૩૬

લોકો બ્રહ્મ ગુરુર્બ્રહ્મ શિષ્યો બ્રહ્મ સદાશિવઃ ॥ ૯૨॥

તેજોબિન્દુ ૬।૩૭

પૂર્વં બ્રહ્મ પરં બ્રહ્મ શુદ્ધં બ્રહ્મ શુભાશુભમ્ ॥ ૯૩॥

તેજોબિન્દુ ૬।૩૭

જીવ એવ સદા બ્રહ્મ સ્વયં બ્રહ્મ સનાતનમ્ ॥ ૯૪॥

તેજોબિન્દુ ૬।૩૮

ઇતિ સાર્ધાન્તિકબ્રહ્મસ્વરૂપવાક્યાનિ ચતુર્નવતિઃ ॥ ૯૪॥

સપ્તદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૮ અથ સાર્ધાન્તિકાવશિષ્ટવાક્યાનિ । (૩૬)

સર્વવિશેષં નેતિનેતીતિ વિહાય યદવશિષ્યતે તદદ્વયં બ્રહ્મ ॥ ૧॥

અદ્વયતારક ૩

જીવભાવજગદ્ભાવબાધે પ્રત્યગભિન્નં બ્રહ્મૈવાવશિષ્યતે ॥ ૨॥

પૈઙ્ગલ ૨

પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ॥ ૩॥

શાન્તિ પાઠ

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥ ૪॥

શાન્તિ પાઠ

કાર્યોપાધિરયં જીવઃ કારણોપાધિરીશ્વરઃ ॥ ૫॥

ત્રિપાદ્વિભૂતિમહાનારાયણ ૪

કાર્યકારણતાં હિત્વા પૂર્ણબોધોઽવશિષ્યતે ॥ ૬॥

શુકરહસ્ય ૩।૧૨

તતઃ સ્તિમિતગમ્ભીરં ન તેજો ન તમસ્તતમ્ ॥ ૭॥

યોગકુણ્ડલી ૩।૨૪

અનાખ્યમનભિવ્યક્તં સત્કિઞ્ચિદવશિષ્યતે ॥ ૮॥

મહા ૨।૬૫

સઙ્કલ્પમનસી ભિન્ને ન કદાચન કેનચિત્ ॥ ૯॥

મહા ૪।૫૩

સઙ્કલ્પજાતે ગલિતે સ્વરૂપમવશિષ્યતે ॥ ૧૦॥

મહા ૪।૫૩

મહાપ્રલયસમ્પત્તૌ હ્યસત્તાં સમુપાગતે ॥ ૧૧॥

મહા ૪।૫૫

અશેષદૃશ્યે સર્ગાદૌ શાન્તમેવાવશિષ્યતે ॥ ૧૨॥

મહા ૪।૫૫

ખેદોલ્લાસવિલાસેષુ સ્વાત્મકર્તૃતયાનયા ॥ ૧૩॥

મહા ૬।૩

સ્વસઙ્કલ્પે ક્ષયં યાતે સમતૈવાવશિષ્યતે ॥ ૧૪॥

મહા ૬।૩

સમતા સર્વભાવેષુ યાસૌ સત્યપરા સ્થિતિઃ ॥ ૧૫॥

મહા ૬।૪

પરમામૃતનામ્ની સા સમતૈવાવશિષ્યતે ॥ ૧૬॥

મહા ૪।૧૬

કાલત્રયમુપેક્ષિત્વા હીનાયાશ્ચૈત્યબન્ધનૈઃ ॥ ૧૭॥

સન્ન્યાસ ૨।૨૭

ચિતશ્ચૈત્યનુપેક્ષિત્ર્યાઃ સમતૈવાવશિષ્યતે ॥ ૧૮॥

સન્ન્યાસ ૨।૨૭

સા હિ વાચામગમ્યત્વાદસત્તામિવ શાશ્વતીમ્ ॥ ૧૯॥

સન્ન્યાસ ૨।૨૮

નૈરાત્મ્યસિદ્ધાન્તદશામુપયાતેઽવશિષ્યતે ॥ ૨૦॥

સન્ન્યાસ ૨।૨૮

યાવદ્યાવન્મુનિશ્રેષ્ઠ સ્વયં સન્ત્યજ્યતેઽખિલમ્ ॥ ૨૧॥

અન્નપૂર્ણા ૧।૪૪

તાવત્તાવત્પરાલોકઃ પરમાત્મૈવ શિષ્યતે ॥ ૨૨॥

અન્નપૂર્ણા ૧।૪૪

અભ્યાસેન પરિસ્પન્દે પ્રાણાનાં ક્ષયમાગતે ॥ ૨૩॥

અન્નપૂર્ણા ૨।૩૨

મનઃ પ્રશમમાયાતિ નિર્વાણમવશિષ્યતે ॥ ૨૪॥

અન્નપૂર્ણા ૨।૩૨

જ્ઞેયવસ્તુપરિત્યાગે વિલયં યાતિ માનસમ્ ॥ ૨૫॥

શાણ્ડિલ્ય ૧।૫।૨૩

માનસે વિલયં યાતે કૈવલ્યમવશિષ્યતે ॥ ૨૬॥

શાણ્ડિલ્ય ૧।૫।૨૩

યતો વાચો નિવર્તન્તે વિકલ્પકલનાન્વિતાઃ ॥ ૨૭॥

અન્નપૂર્ણા ૨।૩૩

વિકલ્પસઙ્ક્ષયાજ્જન્તોઃ પદં તદવશિષ્યતે ॥ ૨૮॥

અન્નપૂર્ણા ૨।૩૩

ચિદ્વ્યોમેવ કિલાસ્તીહ પરાપરવિવર્જિતમ્ ॥ ૨૯॥

અન્નપૂર્ણા ૫।૩૬

સર્વત્રાસમ્ભવચ્ચૈત્યં યત્કલ્પાન્તેઽવશિષ્યતે ॥ ૩૦॥

અન્નપૂર્ણા ૫।૩૬

પઞ્ચરૂપપરિત્યાગાદર્થરૂપપ્રહાણતઃ ॥ ૩૧॥

બહ્વૃચા

અધિષ્ઠાનં પરં તત્ત્વમેકં સચ્છિષ્યતે મહત્ ॥ ૩૨॥

બહ્વૃચા

સર્વવેદાન્તસિદ્ધાન્તસારં વચ્મિ યથાર્થતઃ ॥ ૩૩॥

કઠરુદ્ર ૪૨

સ્વયં મૃત્વા સ્વયં ભૂત્વા સ્વયમેવાવશિષ્યતે ॥ ૩૪॥

કઠરુદ્ર ૪૨

અશબ્દમસ્પર્શમરૂપમવ્યયં તથાઽરસં નિત્યમગન્ધવચ્ચ યત્ ॥ ૩૫॥

યોગકુણ્ડલી ૩।૩૫

અનાદ્યનન્તં મહતઃ પરં ધ્રુવં તદેવ શિષ્યત્યમલં નિરામયમ્ ॥ ૩૬॥

કઠ ૧।૩।૧૫

ઇતિ સાર્ધાન્તિકાવશિષ્ટવાક્યાનિ ષટ્ત્રિંશત્ ॥૩૬॥

અષ્ટાદશં પ્રકરણં સમાપ્તમ્ ।

---

૧૯ અથ સાર્ધાન્તિકફલવાક્યાનિ । (૪૦)

સ યો હ વૈ તત્પરમં ॥ ૧॥

રુદ્રહૃદય ૫૨

બ્રહ્મ વેદ બ્રહ્મૈવ ભવતિ ॥ ૨॥

મુણ્ડક ૩।૨।૯

બ્રહ્મવિદાપ્નોતિ પરમ્ ॥ ૩॥

તૈત્તિરીય ૨।૧।૧

બ્રહ્મસંસ્થોઽમૃતત્વમેતિ ॥ ૪॥

છાન્દોગ્ય ૨।૨૩।૧

તરતિ શોકમાત્મવિત્ ॥ ૫॥

છાન્દોગ્ય ૭।૧।૩

ય એવં વેદાહં બ્રહ્માસ્મીતિ સ ઇદં સર્વં ભવતિ ॥ ૬॥

બૃહદારણ્યક ૧।૪।૧૦

સ એષ વિસુકૃતો વિદુષ્કૃતો બ્રહ્મવિદ્વિદ્વાન્બ્રહ્મૈવાભિપ્રૈતિ ॥ ૭॥

કૌષીતકીબ્રાહ્મણ ૧।૪

તદ્બ્રહ્મૈવાહમસ્મીતિ બ્રહ્મ પ્રણવમનુસ્મરન્ ભ્રમરકીટન્યાયેન
શરીરત્રયમુત્સૃજ્ય સન્ન્યાસેનૈવ દેહત્યાગં કરોતિ સ કૃતકૃત્યો ભવતિ ॥ ૮॥

નારદપરિવ્રાજક ૩।૮૬

તમેવ જ્ઞાત્વા વિદ્વાન્ મૃત્યુમુખાત્ પ્રમુચ્યતે ॥ ૯॥

નારદપરિવ્રાજક ૯।૧

તદેવં વિદ્વાંસ ઇહૈવામૃતા ભવન્તિ ॥ ૧૦॥

શાટ્યાયની ૧૮

અનાદ્યનન્તં મહતઃ પરં ધ્રુવં નિચાય્ય તં મૃત્યુમુખાત્પ્રમુચ્યતે ॥ ૧૧॥

કઠ ૧।૩।૧૫

યજ્જ્ઞાત્વા મુચ્યતે જન્તુરમૃતત્વં ચ ગચ્છતિ ॥ ૧૨॥

કઠ ૨।૩।૮

યદા પશ્યઃ પશ્યતે રુક્મવર્ણં કર્તારમીશં પુરુષં બ્રહ્મયોનિમ્ ॥ ૧૩॥

મુણ્ડક ૩।૩।૧

તદા વિદ્વાન્પુણ્યપાપે વિધૂય નિરઞ્જનઃ પરમં સામ્યમુપૈતિ ॥ ૧૪॥

મુણ્ડક ૩।૧।૩

એતદ્યો વેદ નિહિતં ગુહાયાં સોઽવિદ્યાગ્રન્થિં વિકિરતીહ સોમ્ય ॥ ૧૫॥

મુણ્ડક ૨।૧।૧૦

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ॥ ૧૬॥

યોગશિખા ૫।૪૫

ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૧૭॥

યોગશિખા ૫।૪૫

યથા નદ્યઃ સ્યન્દમાનાઃ સમુદ્રેઽસ્તં ગચ્છન્તિ નામરૂપે વિહાય ॥ ૧૮॥

મુણ્ડક ૩।૨।૮

તથા વિદ્વાન્નામરૂપાદ્વિમુક્તઃ પરાત્પરં પુરુષમુપૈતિ દિવ્યમ્ ॥ ૧૯॥

મુણ્ડક ૩।૨।૮

જ્ઞાત્વા તં મૃત્યુમત્યેતિ નાન્યઃ પન્થા વિમુક્તયે ॥ ૨૦॥

કૈવલ્ય ૧।૯

તદ્બ્રહ્માહમિતિ જ્ઞાત્વા બ્રહ્મ સમ્પદ્યતે ધ્રુવમ્ ॥ ૨૧॥

અમૃતબિન્દુ ૮

યત્ર યત્ર સ્થિતો જ્ઞાની પરમાક્ષરવિત્સદા ॥ ૨૨॥

બ્રહ્મવિદ્યા ૪૯

પરબ્રહ્મણિ લીયતે ન તસ્યોત્ક્રાન્તિરિષ્યતે ॥ ૨૩॥

યોગતત્ત્વ ૧૦૮

યદ્યત્સ્વાભિમતં વસ્તુ તત્ત્યજન્મોક્ષમશ્નુતે ॥ ૨૪॥

મહા ૪।૮૮

અસઙ્કલ્પનશસ્ત્રેણ છિન્નં ચિત્તમિદં યદા ॥ ૨૫॥

મહા ૪।૯૧

સર્વં સર્વગતં શાન્તં બ્રહ્મ સમ્પદ્યતે તદા ॥ ૨૬॥

મહા ૪।૯૧

પ્રિયેષુ સ્વેષુ સુકૃતમપ્રિયેષુ ચ દુષ્કૃતમ્ ॥ ૨૭॥

નારદપરિવ્રાજક ૩।૫૧

વિસૃજ્ય ધ્યાનયોગેન બ્રહ્માપ્યેતિ સનાતનમ્ ॥ ૨૮॥

નારદપરિવ્રાજક ૩।૫૧

ઘટાકાશમિવાત્માનં વિલયં વેત્તિ તત્ત્વતઃ ॥ ૨૯॥

પૈઙ્ગલ ૪।૧૪

સ ગચ્છતિ નિરાલમ્બં જ્ઞાનાલોકં સનાતનમ્ ॥ ૩૦॥

પૈઙ્ગલ ૪।૧૪

તૃણાગ્રેષ્વમ્બરે ભાનૌ નરનાગામરેષુ ચ ॥ ૩૧॥

અન્નપૂર્ણા ૫।૯૪

યત્તિષ્ઠતિ તદેવાહમિતિ મત્વા ન શોચતિ ॥ ૩૨॥

અન્નપૂર્ણા ૫।૯૪

સર્વસાક્ષિણમાત્માનં વર્ણાશ્રમવિવર્જિતમ્ ॥ ૩૩॥

વરાહ ૨।૧૩

બ્રહ્મરૂપતયા પશ્યન્બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૩૪॥

વરાહ ૨।૧૩

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ॥ ૩૫॥

વરાહ ૨।૨૦

વિદિત્વા સ્વાત્મનો રૂપં ન બિભેતિ કુતશ્ચન ॥ ૩૬॥

મહા ૪।૭૦

વાસનાં સમ્પરિત્યજ્ય મયિ ચિન્માત્રવિગ્રહે ॥ ૩૭॥

મુક્તિકા ૨।૧૮

યસ્તિષ્ઠતિ ગતસ્નેહઃ સોઽહં સચ્ચિત્સુખાત્મકઃ ॥ ૩૮॥

મુક્તિકા ૨।૧૮

દર્શનાદર્શને હિત્વા સ્વયં કેવલરૂપતઃ ॥ ૩૯॥

મુક્તિકા ૨।૬૪

ય આસ્તે કપિશાર્દૂલ બ્રહ્મ ન બ્રહ્મવિત્સ્વયમ્ ॥ ૪૦॥

મુક્તિકા ૨।૬૪

ઇતિ સાર્ધાન્તિકફલવાક્યાનિ ચત્વારિંશત્ ॥૪૦॥

એકોનવિંશં પ્રકરણં સમાપ્તમ્ ।

---

૨૦ અથ સાર્ધાન્તિકવિદેહમુક્તિવાક્યાનિ ॥ (૭૭)

વિમુક્તશ્ચ વિમુચ્યતે ॥ ૧॥

કઠ ૨।૨।૧

ગુહાગ્રન્થિભ્યો વિમુક્તોઽમૃતો ભવતિ ॥ ૨॥

મુણ્ડક ૩।૨।૯

અથાકામયમાનો યોઽકામો નિષ્કામ આત્મકામ આપ્તકામો ન તસ્ય પ્રાણા
ઉત્ક્રામન્ત્યત્રૈવ સમવલીયન્તે બ્રહ્મૈવ સન્બ્રહ્માપ્યેતિ ॥ ૩॥

બૃહદારણ્યક ૪।૪।૬

તદ્યથાઽહિ નિર્લ્વયની વલ્મીકે મૃતા પ્રત્યસ્તા શયીતૈવમેવેદં શરીરં
શેતેઽથાયમશરીરોઽમૃતઃ પ્રાણો બ્રહ્મૈવ તેજ એવ ॥ ૪॥

બૃહદારણ્યક ૪।૪।૭

અશરીરો નિરિન્દ્રિયોઽપ્રાણોઽતમાઃ સચ્ચિદાનન્દમાત્રઃ સ સ્વરાટ્ ભવતિ ॥ ૫॥

નૃસિંહતાપિની ૨।૭।૧

પૃથિવ્યપ્સુ પ્રલીયત આપો જ્યોતિષિ લીયન્તે જ્યોતિર્વાયૌ વિલીયતે
વાયુરાકાશ આકાશમિન્દ્રિયેષ્વિન્દ્રિયાણિ તન્માત્રેષુ તન્માત્રાણિ ભૂતાદૌ
વિલીયન્તે ભૂતાદિર્મહતિ વિલીયતે મહાનવ્યક્તે વિલીયતે વ્યક્તમક્ષરે
વિલીયતેઽક્ષરં તમસિ વિલીયતે તમઃ પરે દેવ એકીભવતિ પરસ્તાન્ન
સન્નાસન્ન સદસત્ ॥ ૬॥

સુબાલ ૨

બ્રહ્માણ્ડં તદ્ગતલોકાન્કાર્યરૂપાંશ્ચ કારણત્વં પ્રાપયિત્વા તતઃ
સૂક્ષ્માઙ્ગં કર્મેન્દ્રિયાણિ પ્રાણાશ્ચ જ્ઞાનેન્દ્રિયાણ્યન્તઃકરણચતુષ્ટયં
ચૈકીકૃત્ય સર્વાણિ ભૌતિકાનિ કારણે ભૂતપઞ્ચકે સંયોજ્ય ભૂમિં
જલે જલં વહ્નૌ વહ્નિં વાયૌ વાયુમાકાશે ચાકાશમહઙ્કારે
ચાહઙ્કારં મહતિ મહદવ્યક્તે અવ્યક્તં પુરુષે ક્રમેણ વિલીયતે
વિરાટ્ હિરણ્યગર્ભેશ્વરા ઉપાધિવિલયાત્પરમાત્મનિ લીયન્તે ॥ ૭॥

પૈઙ્ગલ ૩

પ્રારબ્ધક્ષયવશાદ્દેહત્રયભઙ્ગં
પ્રાપ્યોપાધિનિર્મુક્તઘટાકાશવત્પરિપૂર્ણતા વિદેહમુક્તિઃ ॥ ૮॥

મુક્તિકા ૧।૨।૬

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ શ્રિતાઃ ॥ ૯॥

શાટ્યાયની ૨૫

અથ મર્ત્યોઽમૃતો ભવત્યત્ર બ્રહ્મ સમશ્નુતે ॥ ૧૦॥

શાટ્યાયની ૨૫

વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ સન્ન્યાસયોગાદ્યતયઃ શુદ્ધસત્ત્વાઃ ॥ ૧૧॥

મુણ્ડક ૩।૨।૬

તે બ્રહ્મલોકેષુ પરાન્તકાલે પરામૃતાઃ પરિમુચ્યન્તિ સર્વે ॥ ૧૨॥

કૈવલ્ય ૧।૪

તસ્યાભિધ્યાનાદ્યોજનાત્તત્ત્વભાવાદ્ભૂયશ્ચાન્તે વિશ્વમાયાનિવૃત્તિઃ ॥ ૧૩॥

શ્વેતાશ્વતર ૧।૧૦

જીવન્મુક્તપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ॥ ૧૪॥

પૈઙ્ગલ ૩।૩

વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૧૫॥

મહા ૨।૬૩

તતસ્તુ સમ્બભૂવાસૌ યદ્ગિરામપ્યગોચરમ્ ॥ ૧૬॥

અન્નપૂર્ણા ૩।૧૯

યચ્છૂન્યવાદિનાં શૂન્યં બ્રહ્મ બ્રહ્મવિદાં ચ યત્ ॥ ૧૭॥

અન્નપૂર્ણા ૩।૧૯

વિજ્ઞાનમાત્રં વિજ્ઞાનવિદાં યદમલાત્મકમ્ ॥ ૧૮॥

અન્નપૂર્ણા ૩।૨૦

પુરુષઃ સાઙ્ખ્યસૃષ્ટીનામીશ્વરો યોગવાદિનામ્ ॥ ૧૯॥

અન્નપૂર્ણા ૩।૨૦

શિવઃ શૈવાગમસ્થાનાં કાલઃ કાલૈકવાદિનામ્ ॥ ૨૦॥

અન્નપૂર્ણા ૩।૨૧

યત્સર્વશાસ્ત્રસિદ્ધાન્તં યત્સર્વહૃદયાનુગમ્ ॥ ૨૧॥

અન્નપૂર્ણા ૩।૨૧

યત્સર્વં સર્વગં વસ્તુ યત્તત્ત્વં તદસૌ સ્થિતઃ ॥ ૨૨॥

અન્નપૂર્ણા ૩।૨૨

યદનુક્તમનિષ્પન્દં દીપકં તેજસામપિ ॥ ૨૩॥

અન્નપૂર્ણા ૩।૨૨

સ્વાનુભૂત્યૈકમાનં ચ યત્તત્ત્વં તદસૌ સ્થિતઃ ॥ ૨૪॥

અન્નપૂર્ણા ૩।૨૩

યદેકં ચાપ્યનેકં ચ સાઞ્જનં ચ નિરઞ્જનમ્ ॥ ૨૫॥

અન્નપૂર્ણા ૩।૨૩

યત્સર્વં ચાપ્યસર્વં ચ યત્તત્ત્વં તદસૌ સ્થિતઃ ॥ ૨૬॥

અન્નપૂર્ણા ૩।૨૩

નિરાનન્દોઽપિ સાનન્દઃ સચ્ચાસચ્ચ બભૂવ સઃ ॥ ૨૭॥

અન્નપૂર્ણા ૩।૧૮

ન ચેતનો ન ચ જડો ન ચૈવાસન્ન સન્મયઃ ॥ ૨૮॥

અન્નપૂર્ણા ૨।૨૦

અજમમરમનાદ્યમાદ્યમેકં પદમમલં સકલં ચ નિષ્કલં ચ ॥ ૨૯॥

અન્નપૂર્ણા ૩।૨૪

સ્થિત ઇતિ સ તદા નભઃસ્વરૂપાદપિ વિમલાસ્થિતિરીશ્વરક્ષણેન ॥ ૩૦॥

અન્નપૂર્ણા ૩।૨૪

વ્યપગતકલનાકલઙ્કશુદ્ધઃ સ્વયમમલાત્મનિ પાવને પદેઽસૌ ॥ ૩૧॥

મહા ૨।૭૭

સલિલકણ ઇવામ્બુધૌ મહાત્મા વિગલિતવાસનમેકતાં જગામ ॥ ૩૨॥

મહા ૨।૭૭

સંશાન્તદુઃખમજડાત્મકમેકસુમ-
માનન્દમન્થરમપેતરજસ્તમો યત્ ॥ ૩૩॥

અન્નપૂર્ણા ૪।૨૪

આકાશકોશતનવોઽતનવો મહાન્ત-
સ્મિન્પદે ગલિતચિત્તલવા ભવન્તિ ॥ ૩૪॥

અન્નપૂર્ણા ૪।૨૪

વિદેહમુક્ત એવાસૌ વિદ્યતે નિષ્કલાત્મકઃ ॥ ૩૫॥

અન્નપૂર્ણા ૪।૧૯

સમગ્રાગ્ર્યગુણાધારમપિ સત્ત્વં પ્રલીયતે ॥ ૩૬॥

અન્નપૂર્ણા ૪।૧૯

વિદેહમુક્તૌ વિમલે પદે પરમપાવને ॥ ૩૭॥

અન્નપૂર્ણા ૪।૨૦

વિદેહમુક્તિવિષયે તસ્મિન્ સત્ત્વક્ષયાત્મકે ॥ ૩૮॥

અન્નપૂર્ણા ૪।૨૦

ચિત્તનાશે વિરૂપાખ્યે ન કિઞ્ચિદિહ વિદ્યતે ॥ ૩૯॥

અન્નપૂર્ણા ૪।૨૧

ન ગુણા નાગુણાસ્તત્ર ન શ્રીર્નાશ્રીર્ન ચૈકતા ॥ ૪૦॥

અન્નપૂર્ણા ૪।૨૧

જીવન્નેવ સદા મુક્તઃ કૃતાર્થો બ્રહ્મવિત્તમઃ ॥ ૪૧॥

આત્મ ૨૦

ઉપાધિનાશાદ્બ્રહ્મૈવ સન્બ્રહ્માપ્યેતિ નિર્દ્વયમ્ ॥ ૪૨॥

આત્મ ૨૦

શાસ્ત્રેણ ન સ્યાત્પરમાર્થદૃષ્ટિઃ કાર્યક્ષમં નશ્યતિ ચાપરોક્ષાત્ ॥ ૪૩॥

વરાહ ૨।૬૯

પ્રારબ્ધનાશાત્પ્રતિભાસનાશ એવં વિધા નશ્યતિ ચાત્મમાયા ॥ ૪૪॥

વરાહ ૨।૬૯

અહિનિર્લ્વયની સર્પનિર્વોકો જીવવર્જિતઃ ॥ ૪૫॥

વરાહ ૨।૬૭

વલ્મીકે પતિતસ્તિષ્ઠેત્તં સર્પો નાભિમન્યતે ॥ ૪૬॥

વરાહ ૨।૬૭

એવં સ્થૂલં ચ સૂક્ષ્મં ચ શરીરં નાભિમન્યતે ॥ ૪૭॥

વરાહ ૨।૬૮

પ્રત્યગ્જ્ઞાનશિખિધ્વસ્તે મિથ્યાજ્ઞાને સહેતુકે ॥ ૪૮॥

વરાહ ૨।૬૮

નેતિ નેતીતિ રૂપત્વાદશરીરો ભવત્યયમ્ ॥ ૪૯॥

વરાહ ૨।૬૮

વિશ્વશ્ચ તૈજસશ્ચૈવ પ્રાજ્ઞશ્ચેતિ ચ તે ત્રયઃ ॥ ૫૦॥

યોગકુણ્ડલી ૩।૨૧

વિરાડ્ઢિરણ્યગર્ભશ્ચ ઈશ્વરશ્ચેતિ ચ તે ત્રયઃ ॥ ૫૧॥

યોગકુણ્ડલી ૩।૨૨

બ્રહ્માણ્ડં ચૈવ પિણ્ડાણ્ડં લોકા ભૂરાદયઃ ક્રમાત્ ॥ ૫૨॥

યોગકુણ્ડલી ૩।૨૨

સ્વસ્વોપાધિલયાદેવ લીયન્તે પ્રત્યગાત્મનિ ॥ ૫૩॥

યોગકુણ્ડલી ૩।૨૩

તૂષ્ણીમેવ સ્થિતસ્તૂષ્ણીં તૂષ્ણીં સત્યં ન કિઞ્ચન ॥ ૫૪॥

તેજોબિન્દુ ૪।૪૦

કાલભેદં વસ્તુભેદં દેશભેદં સ્વભેદકમ્ ॥ ૫૫॥

તેજોબિન્દુ ૪।૪૧

કિઞ્ચિદ્ભેદં ન તસ્યાસ્તિ કિઞ્ચિદ્વાપિ ન વિદ્યતે ॥ ૫૬॥

તેજોબિન્દુ ૪।૪૨

જીવેશ્વરેતિ વા ક્વેતિ વેદશાસ્ત્રાણિ ક્વાહં ત્વિતિ ॥ ૫૭॥

તેજોબિન્દુ ૪।૪૬

ઇદં ચૈતન્યમેવેતિ અહં ચૈતન્યમિત્યપિ ॥ ૫૮॥

તેજોબિન્દુ ૪।૪૬

ઇતિ નિશ્ચયશૂન્યો યો વૈદેહી મુક્ત એવ સઃ ॥ ૫૯॥

તેજોબિન્દુ ૪।૪૭

બ્રહ્મભૂતઃ પ્રશાન્તાત્મા બ્રહ્માનન્દમયઃ સુખી ॥ ૬૦॥

તેજોબિન્દુ ૪।૩૩

સ્વચ્છરૂપો મહામૌની વૈદેહી મુક્ત એવ સઃ ॥ ૬૧॥

તેજોબિન્દુ ૪।૩૩

બ્રહ્મૈવાહં ચિદેવાહમેવં વાપિ ન ચિન્ત્યતે ॥ ૬૨॥

તેજોબિન્દુ ૪।૩૬

ચિન્માત્રેણૈવ યસ્તિષ્ઠેદ્વૈદેહી મુક્ત એવ સઃ ॥ ૬૩॥

તેજોબિન્દુ ૪।૩૭

ચૈતન્યમાત્રસંસિદ્ધઃ સ્વાત્મારામઃ સુખાસનઃ ॥ ૬૪॥

તેજોબિન્દુ ૪।૪૭

તુર્યતુર્યઃ પરાનન્દો વૈદેહીમુક્ત એવ સઃ ॥ ૬૫॥

તેજોબિન્દુ ૪।૪૮

યસ્ય પ્રપઞ્ચભાનં ન બ્રહ્માકારમપીહ ન ॥ ૬૬॥

તેજોબિન્દુ ૪।૫૧

અતીતાતીતભાવો યો વૈદેહી મુક્ત એવ સઃ ॥ ૬૭॥

તેજોબિન્દુ ૪।૫૩

ચિત્તવૃત્તેરતીતો યશ્ચિત્તવૃત્ત્યવભાસકઃ ॥ ૬૮॥

તેજોબિન્દુ ૪।૫૩

સર્વવૃત્તિવિહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૬૯॥

તેજોબિન્દુ ૪।૫૪

સર્વત્રૈવાહમાત્માસ્મિ પરમાત્મા પરાત્મકઃ ॥ ૭૦॥

તેજોબિન્દુ ૪।૬૨

નિત્યાનન્દસ્વરૂપાત્મા વૈદેહીમુક્ત એવ સઃ ॥ ૭૧॥

તેજોબિન્દુ ૪।૬૨

જીવાત્મા પરમાત્મેતિ ચિન્તાસર્વસ્વવર્જિતઃ ॥ ૭૨॥

તેજોબિન્દુ ૪।૬૫

સર્વસઙ્કલ્પહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૭૩॥

તેજોબિન્દુ ૪।૬૮

આત્મજ્ઞેયાદિહીનાત્મા યત્કિઞ્ચિદિદમાત્મકઃ ॥ ૭૪॥

તેજોબિન્દુ ૪।૭૯

ભાવાભાવવિહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૭૫॥

તેજોબિન્દુ ૪।૭૯

ૐકારવાચ્યહીનાત્મા સર્વવાચ્યવિવર્જિતઃ ॥ ૭૬॥

તેજોબિન્દુ ૪।૭૮

અવસ્થાત્રયહીનાત્મા અક્ષાત્મા ચિદાત્મકઃ॥ ૭૭॥

તેજોબિન્દુ ૪।૭૮

ઇત્યેવં સાર્ધાન્તિકવિદ્યાદિવિદેહકૈવલ્યન્તમહા-
વાક્યાન્યષ્ટોત્તરસહસ્રમ્ ॥ ૧૦૦૮॥

વિંશં પ્રકરણં સમાપ્તમ્ ।

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય-
શ્રીવાસુદેવેન્દ્રસરસ્વતીચરણકમલમકરન્દ-
તૃપ્તસ્વાન્તરામચન્દ્રેન્દ્રગ્રથિતેશાવાસ્યા-

ઘષ્ટોત્તરશતોપનિષત્સારસઙ્ગ્રહ-
ભૂતાષ્ટોત્તરસહસ્રમહાવાક્યરત્નાવલિઃ સંપૂર્ણા ॥

N.B. -
1. The quotations (vAkyAni) with asterisks after the Upanishad names(references) were also searched previously by Shri S. N. Shastri (with translation and commentary for 170+ 'vAkyA'-s)and are available in the archives of Advaitin group:
(http://groups.yahoo.com/neo/groups/advaitin/files/HYPERLINK " HYPERLINK " )

2. Where same quotations occur in more than one upanishad, only one has been quoted.

3. There are some quotations listed whose source could not be located.

---

UNTRACED:
1 sarvatrAdvaitabrahmabuddhiM kuryAt ..

2 sarvaM vikArajAtaM mAyAmAtram
3 bhAvAbhAvakalAvinirmuktaH sarvasaMshayadhvastaH pUrNAhaMbhAvaH kRitakRityo bhavati
4 tadyo.ahaM so.asau yo.asau so.aham
5 nirupaplavaM jyotirAbhyantaraM sarvamAyAtItamapratyagekarasamadvitIyam
6 tajjyotirekamadvitIyaM sarvakalpanAtItaM dhruvamakSharamekaM sadA chakAsti sachchidAnandam
7 nArAyaNa evedaM sarvam nArAyaNAtharvashira 1.
8 sarvashakti paraM brahma nityamApUrNamadvayam
Number of Quotations from each of the 72 Upanishads

આરુણિક ૧૧

આત્મા ૧૬

આત્મબોધ ૧૭

અધ્યાત્મ ૨૪

અદ્વયતારક ૧

ઐતરેય ૧

અક્ષિ ૪

અમૃતબિન્દુ ૭

અમૃતનાદ ૨

અન્નપૂર્ણા ૯૦

અથર્વશિખા ૧

બહ્વૃચા ૪

ભસ્મજાબાલ ૩

બ્રહ્મ ૧

બ્રહ્મવિદ્યા ૨૪

બૃહદારણ્યક ૧૭

ચાન્દોગ્ય ૧૭

ધ્યાનબિન્દુ ૩

ગોપાલતાપિની ૧

હંસ ૧

ઈશ ૨

જાબાલદર્શન ૩

કૈવલ્ય ૧૦

કઠ ૯

કઠરુદ્ર ૫

કૌષીતકી ૧

કેન ૪

કુણ્ડિકા ૫

માણ્ડુક્ય ૯

મહા ૧૦૧

મહાવાક્ય ૨

મૈત્રાયણી ૩

મૈત્રેયી ૩૬

મણ્ડલબ્રાહ્મણ ૧૦

મુદ્ગલ ૧

મુક્તિકા ૨૨

મુણ્ડક ૧૯

નાદબિન્દુ
નારદપરિવ્રાજક ૨૮
નિરાલમ્બ ૧૧
નૃસિંહતાપિનિ ૨૩
પાશુપત ૬
પૈઙ્ગલ ૧૭
પરમહંસ ૨
પરમહંસપરિવ્રાજક ૧
પ્રશ્ન ૧
રામરહસ્ય ૭
રામોત્તરતાપિની ૨
રુદ્રહૃદય ૧
સન્ન્યાસ ૧૨
સરસ્વતીરહસ્ય ૨
સર્વસાર ૭
સૌભાગ્યલક્ષ્મી ૫
શાણ્ડિલ્ય ૧૧
શાન્તિ પાઠ
શાટ્યાયની ૧૧
શુકરહસ્ય ૨૨
શ્વેતાશ્વતર ૨
સુબાલ ૫
સૂર્ય ૧
તારસાર ૧૩
તૈત્તિરીય ૭
તેજોબિન્દુ ૧૯૯
ત્રિપાદ્વિભૂતિ ૨૨
ત્રિપુરતાપિનિ ૧
ત્રિશિખિબ્રાહ્મણ ૫
વાસુદેવ ૧
વજ્રસૂચિકા ૧
વરાહ ૫૫

યાજ્ઞવલ્ક્ય ૨
યોગચૂડામણિ ૫
યોગકુણ્ડલી ૫
યોગશિખા ૧૨
યોગતત્ત્વ ૬

Encoded and proofread by Sunder Hattangadi

---

*mahAvAkyaratnAvalI upaniShadAntargatam*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*